श्रीविद्यापद्धतिः



न· पू· १

४।

ॐ श्रीदेव्यै सिद्धिदात्र्यै नमः श्रीभैरव उवाच अ
थुनापद्धतिं वक्ष्ये श्रीविद्यार्चनसंयुतां गद्यपद्यम
यीं गोप्यां सकलागमनिश्चितां प्रातःकृत्यमकृ
त्वा तु यो देवीं भक्तितोऽर्चयेत् तस्य पूजा तु विफ
ला शोच्य हीना यथा क्रिया ततः श्रीमान् साध
को ब्राह्मे मुहूर्ते शयनतलादुत्थाय करचर
णादि प्रक्षाल्याचम्य निजासने समुपविश्य नि

जशिरसि ब्रह्मरंध्रस्य श्वेतवर्णोऽधोमुखे सहस्रदलक
मलकर्णिकांतर्गत चंद्रमंडलसिंहासनोपरि निषण्णं
स्वगुरुं शुक्लवर्णं मुक्तालंकारभूषितं ज्ञानानंदमुदितमा
नसं सच्चिदानंदविग्रहं त्रिनेत्रं चतुर्भुजं ज्ञानमुद्रापुस्त।
कवराभयकरं वामांगे वामहस्तस्थितरक्तकमलया रक्तव
सनाभरणया स्वप्रियया दक्षिणभुजेनालिंगितं श्वेतवस्त्रा
भरणानुलेपितं मुक्तादामादिभूषितं चंद्रकांतनिभं सर्वदे

ए.
२

2

वंदेहं सर्वतीर्थतीर्थं परमशिवस्वरूपं शांतं स्वप्रसन्नं ध्या
त्वा तच्चरणकमलयुगलविगलदमृतधाराभिः स्वात्मानं
परिप्लुतं विभाव्य मनसा गंधपुष्पधूपदीपनैवेद्यादिभि
रभ्यर्च्य प्रणम्य च ॐ अस्य श्रीगुरुमंत्रस्य सनत्कुमार ऋ
षिः पंक्तिश्छंदः श्रीब्रह्मानंदनाथो देवता ऐं बीजं ह्रीं
शक्तिः श्रीं कीलकं मम श्रीधर्मार्थकाममोक्षार्थे जपे वि
नियोगः इति कृतांजलिः स्थित्वा न्यसेत् अथ करषडंगन्या

मः ऊँऐंह्रींश्रींअंगुष्ठाभ्यांनमः हृदयायनमः ह्स्ख्फ्रें
तर्जनीभ्यांस्वाहा शिरसेस्वाहा ह्स्र्क्ष्म्ल्व्य्ऊं मध्यमा
भ्यांवषट् शिखायैवषट् स्ह्ख्फ्रेंअनामिकाभ्यांहुं कव
चायहुं स्ह्क्ष्म्ल्व्र्य्ऊंकनिष्ठिकाभ्यांवौषट् नेत्रत्रया
यवौषट् ह्सौंः स्हौंः अमुकानंदनाथश्रीअमुकांबाश्रीपादु।
कांपूजयामिनमः करतलकरपृष्ठाभ्यांफट् अस्त्रायफट्
इतिकरषडंगः ऊँऐंह्रींश्रीं ह्सख्फ्रें ह्सरक्ष्मलवयऊं

3

ग्र. ३

सहखफ्रें सहक्षमलवरयूं ह्सौः स्हौः श्रीमच्छ्रीस्वामिप्र
तापकौलानंदनाथश्रीपादुकांश्रीदयावत्यंबाश्रीपादुकां
पूजयामि नमः इति दर्शयाद्विमर्श्य दंडवत्प्रणामं मनसा।
कुर्यात् सहस्रदलपंकजे सकलशीतरश्मिप्रभं वराभय
करांबुजं विमलगंधपुष्पांबरं प्रसन्नवदनेक्षणं सकलदेव
तास्वरूपिणं स्मरेत् शिरसि हंसगं तदभिधानपूर्वं गुरुं। [illegible]
तविलेपमाल्यवसनं वामेन रक्तोत्पलं बिभ्रत्या प्रियया युत

प्रि २

रेणान्तरमाश्लिष्टंप्रसन्नाननं हस्ताभ्यामभयंवरंचदध
तंशंभुस्वरूपंपरंहालालोहितलोचनोत्पलयुगंवंदे
शिरःस्थंगुरुं इतिध्यात्वा मानसोपचारैःगुरुंसंपूज्य लं
पृथिव्यात्मकंगंधंश्रीगुरुमूर्तयेनमः॰ हंआकाशात्मकंपुष्पं
श्रीगुरुमूर्तयेनमः॰ यंवाय्वात्मकंधूपंश्रीगुरुमूर्तयेनमः॰ रंव
ह्न्यात्मकंदीपंश्रीगुरुमूर्तयेनमः॰ वंअमृतात्मकंनानानैवेद्यं
श्रीगुरुमूर्तयेनमः॰ संसर्वात्मकंफलमूलतांबूलंश्रीगुरुमू

५

सु.
४

तयेसमर्पयामिनमः इतिमानसोपचारैःसंपूज्य ॐनमा
मिसद्गुरुंशांतंप्रत्यक्षंशिवरूपिणं शिरसायोगपीठस्थं
मुक्तिकामार्थसिद्धये १ श्रीगुरुंपरमानंदंवंदाम्यानंदवि
ग्रहं यस्यसान्निध्यमात्रेणचिदानंदायतेपरं २ नमोस्तुगु
रवेतस्मायिष्टदेवस्वरूपिणे यस्यवागमृतंहंतिविषंसं
सारसंज्ञकं ३ अखंडमंडलाकारंव्याप्तंयेनचराचरं तत्पदं
दर्शितंयेनतस्मैश्रीगुरवेनमः ४ अज्ञानतिमिरांधस्यज्ञा।

नांजनशलाकया चक्षुरुन्मीलितंयेनतस्मैश्रीगुरवेनमः ५
गुरुर्ब्रह्मागुरुर्विष्णुर्गुरुःसाक्षान्महेश्वरः गुरुरेवजगत्सर्वं
तस्मैश्रीगुरवेनमः ६ नवायनवरूपायपरमार्थैकरूपिणे 5
सर्वाज्ञानतमोभेदभानवेचिद्घनायते ७ नमस्तेनाथभग
वन्शिवायगुरुरूपिणे विद्यावतारसंसिद्धैस्वीकृतानेकवि
ग्रहः ८ स्वतंत्रायदयाक्लृप्तविग्रहायपरात्मने परतंत्रायभ
क्तानांभव्यानांभव्यरूपिणे ९ विवेकिनांविवेकायविमर्शाय

विमर्शिनां प्रकाशिनांप्रकाशायज्ञानिनांज्ञानरूपिणे ९ पु
रस्तात्पार्श्वयोःपृष्ठेनमस्कुर्यामुपर्यधः सदासच्चित्तरूपेणवि
धेहिभवदासने ॥ त्वत्प्रसादादहंदेवकृतकृत्योस्मिसर्वतः
मायामृत्युमहापाशाद्विमुक्तोस्मिशिवोस्मिच १० इत्येतैर्मंत्रैः
श्रीगुरुंदंडवन्मनसाप्रणम्य स्वप्रसन्नंविभाव्य मनसातदा।
ज्ञांगृहीत्वा मूलाधारेस्वर्णवर्णचतुर्दलकमलकर्णिकांत
र्गतश्रृंगाटपीठांतर्गत त्रिकोणपीठोपरि परांशक्तिंकुंडलिनी

सर्पाकारां मूर्ध्वस्रवंतीं सार्धत्रिवलयां उद्यद्दिनकरसहस्रभा
स्वरां विद्युत्कोटिसन्निभां बिसतंतुतनीयसीं पंचाशद्वर्णविग्र
हामष्टात्रिंशत्कलारूपिणीं त्रियामयामानं सर्वप्राणिजीवां
सर्वदेवाधिदेवीं सकलमंत्रमातरं स्वमां विभाव्य गुरूपदिष्टमा
नि.अ.३ र्गेणं सहजनादेन सचेतन्यां विधाय तत्र चतुर्दलेषु ॐ ऐं ह्रीं श्रीं
वं नमः ॐ शं नमः ॐ षं नमः ॐ सं नमः इति पत्रेषु मध्ये मूलेन च
प्रादक्षिण्येन संपूज्य हंसः इति मंत्रेण कमलात्कमलांतरं नीत्वा

प्र.
६
6

ततःस्वाधिष्ठानेलिंगमूलेविद्रुमवर्णेषट्दलकमलेतांनी
त्वा तत्र ॐवंनमः ॐभंनमः ॐमंनमः ॐयंनमः ॐरंनमः ॐलंन
मः इतिपत्रेषुमध्येमूलेनचसंपूज्य ततोमणिपूरकेनाभौ
नीलवर्णेदशदलकमलेतांनीत्वा तत्र ॐडंनमः ॐढंनमः
ॐणंनमः ॐतंनमः ॐथंनमः ॐदंनमः ॐधंनमः ॐनंमः ॐपं
नमः ॐफंनमः इतिपत्रेषुमध्येमूलेनचसंपूज्य ततोवक्षस्य
ऽनाहतेपिंगलवर्णेद्वादशदलकमलेतांनीत्वा तत्र ॐकंनमः

ॐ खंनमः ॐ गंनमः ॐ घंनमः ॐ ङंनमः ॐ चंनमः ॐ छंनमः ॐ
जंनमः ॐ झंनमः ॐ ञंनमः ॐ टंनमः ॐ ठंनमः इतिपत्रेषुमध्ये
मूलेनचसंपूज्य ततोविशुद्धौकंठेधूम्रवर्णेषोडशदलकम
लेतांनीत्वा तत्र ॐ अंनमः ॐ आंनमः ॐ इंनमः ॐ ईंनमः ॐ उंनमः
ॐ ऊंनमः ॐ ऋंनमः ॐ ॠंनमः ॐ ऌंनमः ॐ ॡंनमः ॐ एंनमः ॐ ऐंनमः
ॐ ओंनमः ॐ औंनमः ॐ अंनमः ॐ अःनमः इतिपत्रेषुमध्येमूलेन
चसंपूज्य ततोभ्रूमध्ये आज्ञाचक्रेविद्युद्वर्णेद्विदलकमलेतां

7

१९.

नीत्वा तत्र ॐ हं नमः ॐ क्षं नमः इतिपत्रेषु मध्ये मूलेन च संपु
ट्य ततो ब्रह्मरंध्रगतसहस्रदलकमलं प्रापय्य तत्र बिंदु
रूपतेजोमयपरमशिवेन सहैकतां नीत्वा ततः स्रवतापरमा
मृतेन तां संतर्प्य तत्र नादश्रवणतत्परो मुहूर्तं लयं विभाव्य
ततोऽवरोहे सोहमिति मंत्रेण तां कुंडलिनीं आज्ञाचक्रे विशु
द्धवर्णं द्विदलकमले समानीय तत्र ॐ हं नमः ॐ क्षं नमः इतिपत्र
योः मध्ये मूलेन च संपुट्य ततो विशुद्धौ कंठे स्वरवर्णषोडशद

लकमलेनाँमानीय तत्र ॐअंनमः ॐआंनमः ॐइंनमः ॐईंनमः
ॐउंनमः ॐऊंनमः ॐऋंनमः ॐॠंनमः ॐऌंनमः ॐॡंनमः ॐएं
नमः ॐऐंनमः ॐओंनमः ॐऔंनमः ॐअंनमः ॐअःनमः इतिप
त्रेषुमध्येमूलेनचाभ्यर्च्य ततोवक्षस्यनाहतेपिंगलवर्णेद्वाद
शदलकमलेसमानीय तत्र ॐकंनमः ॐखंनमः ॐगंनमः ॐघं
नमः ॐङंनमः ॐचंनमः ॐछंनमः ॐजंनमः ॐझंनमः ॐञंनमः ॐटं
नमः ॐठंनमः इतिपत्रेषुमध्येमूलेनचाभ्यर्च्य ततोमणिपूरेना

ष्ट.
८

8

भौनीलवर्णेदशदलकमलेतांसमानीय तत्र ॐडंनमः ॐढंन
मः ॐणंनमः ॐतंनमः ॐथंनमः ॐदंनमः ॐधंनमः ॐनंनमः ॐपंन
मः ॐफंनमः इतिपत्रेषुमध्येमूलेनचसंपूज्य ततःस्वाधिष्ठानेलिं
गमूलेविद्रुमवर्णेषट्दलकमलेतांसमानीय तत्र ॐबंनमः ॐ
भंनमः ॐमंनमः ॐयंनमः ॐरंनमः ॐलंनमः इतिपत्रेषुमध्येमूले
नचाभ्यर्च्य ततोमूलाधारेस्वर्णवर्णेचतुर्दलकमलेतांसमानीय
तत्रस्थापयेत् ततोमूलाधारे तत्र ॐवंनमः ॐशंनमः ॐषंनमः

ॐ सं नमः मध्ये मूलेन तां समर्चयेत् इत्यारोहावरोहक्रमेण
परां शक्तिं कुंडलिनीं ध्यात्वा प्रकाशमानां प्रथमे प्रयाणे प्रति
प्रयाणे त्वमृतावसानां अंतःपदव्यामनुसंचरंतीमानंदरू
पामबलां प्रपद्ये । नाहमस्मि न चान्योस्मि ब्रह्मैवाहं न शोक
भाक् सच्चिदानंदरूपोहं स्वात्मानमिति चिंतयेत् हन्मंत्रेण
लयं विभावयेत् मूलाधारे वह्निमंडले दशकलात्मके विभा
व्य तत्र मूलविद्यायाः प्रथमकूटं वाग्भवाख्यं संस्फुरत्तडिल्लता

ए. ५

भास्वरं अनाहतपर्यंतप्राप्तनादशिखं विभाव्य अनाहते सू
र्यमंडलं द्वादशकलात्मकं ध्यात्वा तन्मध्ये मूलविद्यायाः काम
राजाख्यं द्वितीयकूटं उद्यदादित्यसंकाशमाज्ञापर्यंतप्राप्तना
दशिखं अथऊर्ध्वप्रसृतरश्मिकं ध्यात्वा आज्ञायां सोममंडलं षो
डशकलात्मकं विभाव्य तन्मध्ये मूलविद्यायाः शक्तिकूटाख्यं
तृतीयखंडं शशिप्रभं ब्रह्मरंध्रांतर्गतविहूर्ध्वमंडलपर्यंतप्राप्त
नादशिखं ध्यात्वा ततो मूलाधारादिब्रह्मरंध्रांतं मूलविद्यां

उद्यद्दिनकरसहस्रभास्वरांतेजोमयींमत्त्वेंध्यात्वा तत्ते
जसाव्याप्तंस्वदेहंविचिंत्य तत्तेजसापरिणतांश्रीपरदेवतांहृद
यकमलेध्यात्वा मानसोपचारैःसंपूज्य लंपृथिव्यात्मकंगंधं
श्रीमहात्रिपुरसुंदरीश्रीपादुकायैसमर्पयामिनमः हंआका
शात्मकंपुष्पंश्रीमहात्रिपुरसुंदरीश्री० यंवाय्वात्मकंधूपंश्री
महात्रिपुरसुंदरीश्री० रंवह्न्यात्मकंदीपंश्रीमहात्रिपुरसुंदरी
श्री० वंअमृतात्मकंनानानैवेद्यंश्रीमहात्रिपुरसुंदरीश्री० संस

पू॰
१०

10

र्वात्मकं फलमूलतांबूलादिकं श्रीमहात्रिपुरसुंदरीश्रीपादुका
ंसमर्पयामिनमः प्राणायामत्रयंकुर्यात्तद्यथा तत्रविहितप
द्मासनःसाधकोमूलाधारार्पितचित्तवृत्ति मूलंप्रणवंवा
षोडशवारमुच्चरन् दक्षांगुष्ठेनदक्षनासापुटंनिरुध्यवामेन
पवनंपूरयेत् ततस्तमेवचतुःषष्टिवारमुच्चरन् दक्षानामा
कनिष्ठिकाभ्यांवामनासापुटंचतथैवनिरुध्य द्वाभ्यांपवनं
कुंभयेत् ततस्तमेवद्वात्रिंशद्वारमुच्चरन् वामनासापुटंत

थैवनिरुध्य दक्षेनपवनेनपूरयेत् इत्येकः प्राणायामः एषएव विपर्ययेणकृतोद्वितीयः प्रथमवत्तृतीयः इत्थंप्राणायामत्रये णनिरस्तसकलकल्मषंदेवताराधनयोग्यंस्वशरीरंविभाव्य ऋष्यादिस्मरणंविदधीततद्यथा तत्रादौश्रीमहागणपतेः अस्य श्रीमहागणपतिमंत्रस्य श्रीब्रह्माऋषिः गायत्रेछंदः श्रीमहा गणपतिर्देवता गंबीजं ह्रींशक्तिः नमःकीलकं ममधर्मार्थकामः फलप्राप्त्यर्थंगणपतिप्रसादसिद्ध्यर्थेजपेविनियोगः इति।

ऋष्यादिन्यासः अथकरषडंगन्यासः ॐगांअंगुष्ठाभ्यांनमः हृद
यायनमः गींतर्जनीभ्यांस्वाहा शिरसेस्वाहा गूंमध्यमाभ्यांवष
ट् शिखायैवषट् गैंअनामिकाभ्यांहुं कवचायहुं गौंकनिष्ठि
काभ्यांवौषट् नेत्रत्रयायवौषट् गःकरतलकरपृष्ठाभ्यांफट् अ
स्त्रायफट् इतिकरषडंगः ततःस्वहृदयकमलेश्रीमहागण
पतिंध्यायेद्यथा अथध्यानं ॐगजवदनमचिंत्यंतीक्ष्णदंष्ट्रंत्रिने
त्रंबृहदुदरमनंतंदंतमालेदधानं परमसुखवषकपद्मंहंहहस्तार

विंदंहरियुगलनिविष्टंश्रीगणेशंभजामि अथगायत्री मंत्र
त्पुरुषायविद्महे वक्रतुंडायधीमहि तन्नोदंतीप्रचोदयात् १
मानसोपचारैःसंपूज्य अथमंत्रः ह्रींगंह्रींगणपतयेनमः १
तिमंत्रः मालामादाय यथाशक्तिजपंविधाय गुह्यातिगुह्य॰
इतितेजोमयंजपफलंदेवतावामहस्ते समर्प्य योनिमुद्रयाप्र
णमेत् ततःश्रीभैरवमंत्रेणप्राणायामंविधाय अस्यश्रीकामे
श्वरभैरवमंत्रस्य दक्षिणामूर्तिऋषिः पंक्तिछंदः श्रीकामेश्वरो

12

ए. १२

देवता श्रीबीजं ह्रीशक्तिः क्लीकीलकं ममश्रीविद्यामंत्रसिद्धयेजपेविनियोगः इतिऋष्यादिन्यासः अथकरषडंगन्यासः ऐंअंगुष्ठाभ्यांनमः हृदयायनमः क्लींतर्जनीभ्यांस्वाहा शिरसेस्वाहा सौंःमध्यमाभ्यांवषट् शिखायैवषट् ऐंअनामिकाभ्यांहुं कवचायहुं क्लींकनिष्ठिकाभ्यांवौषट् नेत्रत्रयायवौषट् सौंःकरतलकरपृष्ठाभ्यांफट् अस्त्रायफट् इतिकरषडंगः श्रीपरभैरवंध्यायेद्यथा अथध्यानं सूर्यकोटिसमानाभंचंद्रमौलिंत्रिलोचनं

पाशांकुशाय नुर्वीणान्धारयंतंशिवंभजे इति ध्यात्वा मान

सोपचारैराराध्य अथगायत्री ॐकामेश्वराय विद्महे शक्तीश्व

राय धीमहि तन्नआत्माप्रचोदयात् १ अथमंत्रः अंह्रींश्रीं।

ह्रींकामेश्वरायनमः पुनरपिप्राणायामऋष्यादिकरषडं

गन्यासान्विधाय गुह्यातिगुह्य इति योनिमुद्रयातेजोम

यंजपफलंदेवतावामहस्ते समर्प्य प्रणम्यच अस्यश्रीम

हात्रिपुरसुंदरीमंत्रराजस्य श्रीदक्षिणामूर्तिऋषिः पंक्ति।

13

ए.
१३

13

छंदः श्रीमहात्रिपुरसुंदरीदेवता ऐंप्रथमकूटंबीजं सौः
तृतीयकूटंशक्तिः क्लींद्वितीयकूटंकीलकं ममश्रीचतुर्वर्ग
सिद्धयेजपेविनियोगः इतिऋष्यादिन्यासः अथकरषडंगन्या
सः ऐंप्रथमकूटंअंगुष्ठाभ्यांनमः हृदयायनमः क्लींद्वितीय
कूटंतर्जनीभ्यांस्वाहा शिरसेस्वाहा सौःतृतीयकूटंमध्यमा
भ्यांवषट् शिखायैवषट् ऐंप्रथमकूटंअनामिकाभ्यांहुं क
वचायहुं क्लींद्वितीयकूटंकनिष्ठिकाभ्यांवौषट् नेत्रत्रयायवौ

षट् सौः तृतीयकूटं करतलकरपृष्ठाभ्यां फट् अस्त्राय फट्
इति करषडंगः ततः हृदयकमले स्वाभेदेन श्रीदेवीं ध्यायेत्।
यथा अथ ध्यानं उद्यत्प्रहेमरुचिरांरविचंद्रवह्निनेत्रांयन्तु:
शारयुतां अंकुशकाशपाशान् रम्यैः भुजैर्दधतीं शिवशक्तिरू
पां कामेश्वरीं हृदि भजामि धृतेंदुलेखां इति ध्यात्वा मानसोप
चारैः संपूज्य मंत्रसंस्कारं कुर्यात् तत्रादौ कीलनं सकलह्रीं
मः हसकहलह्रीं हसकहलह्रीं इति विर्जयेत् ह्रीं ह्रीं ह्रीं हस।

ए०
१४

कहलह्रीं हसकहलह्रीं सकलह्रीं इतिसंजीवनं तंमूलं थं
दं यं नं इतिनौटिल्यविः ऐंसौंः ह्रीं रुद्रशापंमोचय २ फट्स्वाहा
इतिदशयाशापहरीविद्या ऐंसौंः श्रीं ह्रीं क्लीं ॐ ह्रीं श्रीं क्रकङ्का
ह्रायैस्वाहा इतिक्रकङ्कलांदशया ऐंक्लीं ह्रीं त्रिपुरेश्शिभगवा
तिस्वाहा इतिकुल्लुकांमूर्धिदशया ॐ इतिसेतुदशयाह्लादिह्रीं
इतिमहासेतुंदशयाविशुद्धौ ॐ ग्रंमूलं ऐंग्रं ५० ॐ इतिमणिपूरे
निर्वाणंदशया प्रथमंनमस्त्रिपुरायस्वाहायदहर २ ड्रीरितंद्वितीयंहृन

२

कौलान्तृतीयं त्रिपुरीस्वाहा इत्यस्य मंत्रत्रिः ततः श्रीषोडशी
दशाया अथ गायत्री ऐं प्रथमकूटं त्रिपुरेदेवि विद्महे क्लीं द्वि
तीयकूटं कामेश्वरि धीमहि सौः तृतीयकूटं तन्नः शक्तिः प्रचोद
यात् अथ ध्यानं ॐ सूर्यकोटिसमानाभांचतुर्वाऊं त्रिलोचनां
पाशांकुशायनुर्वीणा न्धारयंतीं शिवां भजे इति सहस्रकमलक
र्णिकामध्ये श्रीमहात्रिपुरसुंदरीस्वाभेदेन ध्यात्वा श्रीकामेश्वरभै
रवमंत्रं दशधा जप्त्वा १० ॐ सूलं ॐ इत्यशौचहृदयनिवारणार्थं स

ए.
१५

मयाजपेत् ॐ मां माले माले महामाले सर्वशक्तिस्वरूपिणि चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव इतिमालांवामकरेनिधाय ॐ सिद्ध्यैनमः इतिमालांगंधादिनासंपूज्य गं अविघ्नंकुरुमालेत्वं इतिदक्षकरेणमालांगृहीत्वा स्वशिरसिस्वगुरुं कंठेपीतवर्णंमूलविद्यांहृदये श्रीपरदेवतांश्रीगुरुचरणयोःस्वात्मानंध्यात्वा सूक्ष्मध्यानेषांचतर्णांमैक्यंविभाव्यविमृश्यतौचतुष्टयमेकीभूतमक्षरात्मकमानीय दृष्टिंकृत्वान्

नासाग्रेनिमील्यनयनेथवा जिह्वांलंबांसमासाद्यदंतैर्दंता
न्नपीडयन् ओष्ठौसंपुटकौकृत्वास्थिरचित्तःस्थिरेंद्रियः सदादे
वींहृदिध्यात्वामौनीजपमथाचरेत् यथाशक्तिजपंकृत्वा जपां
ते त्वंमालेसर्वदेवानांप्रीतिदाशुभदामता शुभंकुरुष्वमेभद्रे
यशोवीर्यंचसर्वदा इतिमालांस्वशिरसिसंस्थाप्य पुनरपिप्रा
णायामऋष्यादिकरषडंगन्यासान्विधाय श्रीईश्वरमंत्रंदश
धाजप्त्वा १० ॐ गुह्याति० इतितेजोरूपंजपफलंश्रीदेवीवामहू।

ए.
१६

लेसमर्प्य योनिमुद्रयाप्रणमेत् मालांमूलेनसंस्पृश्य इतिमंत्रे
णमालांरहसिस्थापयेत् ॐप्रातर्नमामिजगतांजनन्याश्चरणां
बुजं श्रीमत्त्रिपुरसुंदर्यानमितायाहराटिभिः १ प्रातस्त्रिपुरसुं
दर्यानमामिचरणांबुजं हरिर्हरोविरिंचिश्चसृष्ट्यादीन्कुरु
तेयथा २ प्रातस्त्रिपुरसुंदर्यानमामिपादपंकजं यत्पाद्यसंबु
शिरसिभातिगंगामहेशितुः ३ प्रातःपाशांकुशशरचापह
स्तांनमाम्यहं उद्यदादित्यसंकाशांश्रीमत्त्रिपुरसुंदरी ४ प्रात

16

र्नमामि पादाब्जं ययेदं भासते जगत् तस्यास्त्रिपुरसुन्दर्याय
त्प्रसादान्निवर्तते ५ यः श्लोकपंचकमिदं प्रातर्नित्यं पठेन्नरः
तस्मै दद्यादात्मपदं श्रीमत्त्रिपुरसुंदरी इति श्रीगुरुमूर्तिंस्म
त्वा श्रीदेवीं मनसा प्रणम्य निजकृत्यं समर्पयेत् ॐ प्रातःप्र
भृति सायांतं सायादि प्रातरंततः यत्करोमि जगन्मातस्तद
स्तु तव पूजनं इति समर्प्य स्वकार्यानुष्ठानाय ॐ त्रैलोक्यचैत
न्यमये सुरेशि श्रीसुंदरि त्वच्चरणाज्ञयैव प्रातः समुत्थाय तव

प्र. ८

प्रियार्थं संसारयात्रामनुवर्तयिष्ये १ संसारयात्रामनुवर्तमानं त्वदाज्ञया श्रीत्रिपुरेपरेशि स्पर्धातिरस्कारकलिप्रमादभयानि मांमाभिभवंतु मातः २ जानामि धर्मं नच मे प्रवृत्तिः जानाम्यधर्मं नच मे निवृत्तिः त्वया हृषीकेशि हृदिस्थया हं यथा नियुक्तोस्मि तथा चरामि ३ इति देव्याज्ञां प्रार्थयित्वा मूलाधारादिद्वादशांतचक्रपर्यंतस्थिताभ्यो गणपतिं प्रभृति देवताभ्यः गुरूपदेशात्तं सहजसिद्धं अजपाजपं तद्देवताभ्यः समर्पयेत् ॐ अद्य

एवंगुर्वहोरात्राचरितशुद्धात्मनिःश्वासात्मकं षट्शताधि
कमेकविंशतिसहस्रसंख्याकमजपाजपं मूलाधारस्वाधि
ष्ठानमणिपूरकानाहतविशुद्धाज्ञाब्रह्मरंध्रेषु चतुर्दलष
ड्दलदशदलद्वादशदलद्विदलसहस्रदलेषु स्वर्णविद्रु
मनीलपिंगलस्फटिकविद्युत्कर्पूरवर्णेषु स्थिताभ्यो गणपति
ब्रह्मविष्णुरुद्रजीवात्मपरमात्मश्रीगुरुपादुकाभ्यो यथा।
भागशः समर्पयिष्यामि इति कृतांजलिः संकल्प्य समर्पये

ए.
१८
18

यथा हकारेण बहिर्याति सकारेण विशेत्पुनः हंसहंसेति
मंत्रेण जीवो जपति सर्वदा षट्शतसदलयुक्ते सम्यगाधारप
द्मे तरुणमरुणगांडवारण्यस्थं गणेशं अभयवरदहस्तं
चापपाशांकुशौ वा करयुगलमनंतं चिंतयेदादिमूर्तिं गाय
त्री गंतत्पुरुषाय विद्महे वक्रतुंडाय धीमहि तन्नो दंती प्रचोद
यात् १ ॐ ऐं ह्रीं श्रीं मूलाधारचक्रस्थाय गणपतये अजपाज
पानां षट्शतानि समर्पयामि नमः ६०० वषमयरलसंज्ञे

रक्तैः पद्मद्वयैः स्वसितमुरति विष्टं पंकजे पद्मयोनिं अभयव
रदहस्तं कुंडिकामक्षमालां विष्टतममलरूपं चिंतयेद्धिरण्य
योनिं गायत्री वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि त
न्नो ब्रह्मा प्रचोदयात् १ ॐ ऐं ह्रीं श्रीं स्वाधिष्ठानचक्रस्थाय ब्रह्म
णे अजपाजपानां षट्सहस्राणि समर्पयामि नमः ६००० इति स्वा
धिष्ठानचक्रे ब्रह्मणे समर्पयेत् अथैः फांतगतैः प्रकल्पित दा
लैः पद्मे निविष्टो हरिः मार्तंडद्युतिमादिरूपमजं नारायणं

19

वि.
१९

चिंतयेत् चक्रांभोजगदादिशंखममलंपीतांवरंकौस्तुभं श्री
वत्सांकितवक्षसंरतनचलत्समीतांवरंचिंतयेत् गायत्री नाराय
णायविद्महे वासुदेवायधीमहि तन्नोविष्णुःप्रचोदयात् १
ॐयेंह्रींश्रींमणिएरकचक्रस्यायविष्णवेअजपाजपानांषट्स
हस्राणिसमर्पयामिनमः ९... इतिमणिएरकचक्रेविष्णवे
समर्पयेत् काद्यैःठांतगतैःप्रकल्पितदलैःपंकेरुहेपावेति।
कांतेकांतशशांककोटिकिरणप्रनेकचत्प्रोज्वलं ह्रांतेठंका।

19

स्रगोवराभयकरैः युक्तं करे कंकणं ग्रैवेयांगदहारनूपुरयुतं
चर्मांबरं चिंतयेत् गायत्री तत्पुरुषाय विद्महे महादेवाय धीम
हि तन्नो रुद्रः प्रचोदयात् १ ॐ ऐं ह्रीं श्रीं अनाहतचक्रस्थाय अ
जपाजपानां षट्सहस्राणि समर्पयामि नमः इति अनाहतच
क्रे समर्पयेत् मत्स्यांगेषु निविष्टमिष्टनिहितं शांतं स्वधामास्प
दं व्यामाशेषचराचरं गुणगणं तं विश्वयोनिं मयं मूर्तामूर्तमने
कमेवममलं ज्योतिः प्रदीपोपमं सान्नान् षोडशापत्रके तममलं

20

ए. जीवंपरंचिंतयेत् गायत्री हंसहंसाय विद्महे परमहंसाय धी।
२. महि तन्नो हंसः प्रचोदयात् ३ ॐ ऐं ह्रीं श्रीं विशुद्धचक्रस्थाय।
जीवात्मने अजपाजपानामकसहस्रं समर्पयामि नमः १०००
७०
इति विशुद्धचक्रे जीवात्मानं समर्पयेत् हंहंमध्यांपरिल्रुप्तप
त्रममलं दिव्यंजगत्कारणं विस्तीर्णं हृद्दलं च देहनिलयं स्वच्छं
दमात्रेच्छया तस्माद्योग्यतया स्वदेशतनुभाभावेकदीपांकुरं
प्रत्यक्तत्त्वरविग्रहं गुरुपदं ध्यायेद्विभुं शाश्वतं गायत्री हं

सहंसायविद्महे परमहंसायधीमहि हंसःसोहंप्रचोदया
त् १ ॐ ऐं ह्रीं श्रीं आज्ञाचक्रस्थायपरमात्मने अजपाजपाना
मेकसहस्रंसमर्पयामिनमः १... इत्याज्ञाचक्रेपरमात्मा
नेसमर्पयेत् विश्वव्यापिनमादिदेवममलंनित्योदितंनि
ष्कलंनित्योद्भूतसहस्रपद्मकमलेलिप्याक्षरैर्मंडितं नित्या
नित्यमनन्यपूर्णंपरिचिन्मयस्फुरत्यात्मकंविद्यात्मानमरू
पविश्वरूपहरस्वच्छंदतःसर्वतः गायत्री निरंजनायविद्महे

पृ० २१

21

निरामासाय धीमहि तन्नो वितन्तुस्तन्म: प्रचोदयात् १ ॐ ऐं ह्रीं श्रीं सहस्रदलकमलकर्णिकामध्यस्थायै श्रीगुरुपादुकायै अजपाजपानामेकसहस्रं समर्पयामि नमः १००० इति सहस्रदलकमले श्रीगुरुं समर्पयेत् एतावत्कर्तुमशक्तश्चेत् अद्य सूर्योदयमारभ्य आगामिसूर्योदयं यावत् अहोरात्रेण चरितमुच्छ्वासनिःश्वासात्मकं षट्शताधिकमेकविंशतिसहस्रसंख्याकमजपाजपं ब्रह्मरंध्रस्थसहस्रदलकमलकर्णि

कामध्यवर्तिन्यै श्रीगुरुपादुकायै समर्पयामि नमः श्रीगुर
वे समर्पयेत् इत्यजपाजपं समर्प्य इति कृतांजलिः संकल्प्य
अजपामंत्रेण प्राणायामं विधाय संकल्पं कुर्याद्यथा ॐ अ
स्य श्री अजपागायत्रीमंत्रराजस्य हंस ऋषिः अव्यक्तगाय।
त्री छंदः परमहंसो देवता हं बीजं सः शक्तिः सोहं कीलकं ॐ
कारस्तत्वं नभः स्थाने हैमो वर्णः उदात्तः स्वरः मम मोक्षार्थे
जपे विनियोगः इति ऋष्यादिन्यासः अथ करषडंगन्यासः

ॐ ऐं ह्रीं श्रीं ह्लां सूर्यात्मने स्वाहा अंगुष्ठाभ्यां नमः हृदयाय
नमः ॐ ह्लीं सोमात्मने स्वाहा तर्जनीभ्यां स्वाहा शिरसे स्वाहा
ॐ ह्लूं निरंजनात्मने स्वाहा मध्यमाभ्यां वषट् शिखायै वषट्
ॐ ह्लैं निराभासात्मने स्वाहा अनामिकाभ्यां हुं कवचाय हुं ॐ
ह्लौं अनंततनुः सूक्ष्मा देवी प्रचोदयात् स्वाहा कनिष्ठिकाभ्यां वौ
षट् नेत्रत्रयाय वौषट् ॐ ह्लः अव्यक्तबोधात्मने स्वाहा करत
लकरपृष्ठाभ्यां फट् अस्त्राय फट् इति करषडंगः अथ ध्यानं

ओं द्यां मूर्धानं यस्य विप्रा वदंति खं वै नाभिं चंद्रसूर्यौ च नेत्रे
दिग्भिः श्रोत्रं यस्य पादौ क्षितिश्च ध्यातव्योऽसौ सर्वभूतांतरा।
त्मा इति विराट्स्वरूपं स्वात्मानं ध्यात्वा तदनुसंध्यायोःप्रा
णवायोः निर्गमप्रवेशात्मकं अजपामंत्रं पंचविंशतिवारं
जप्त्वा समर्प्य गुरूपदिष्टमार्गेण नादानुसंधान एवं केनि
रस्तसमस्तोपाधिना केनापि चिद्विलासेन प्रवर्तमानो।
स्मीति विभाव्य स्वकार्यानुष्ठानाय ओं समुद्रमेखले देवि

ए.
११
23

पर्वतस्तनमंडले विष्णुपत्निनमस्तुभ्यंपादस्पर्शंक्षमस्व मे धारणंपोषणंत्वत्तोभूतानांदेविसर्वदा तेननसत्येनमां पाहिपापान्मोचययधारिणि इतिभूमिंप्रार्थ्य स्वासानुसारे ण तस्यांपादंनिधाय पदेपदे मूलमुच्चरन् नंदंतुसाधकः सर्वे· ततःगृहाद्बहिर्निर्गत्य ग्रामाद्बहिर्नैर्ऋत्यांयाम्यांवा दिशिशरक्षेपमात्रंभुवमतीत्य ॐठंठंस्वाहा इतिमंत्रेण पर्णैस्तृणैर्वाभूमिमाछाद्य मलादिकमुत्सृजेत् ग्रीष्मे

व्यैनमः इतिमंत्रेणमृदादिकंशौचंकुर्यात् मलमूत्रोत्स
र्गविसर्जनं नत्रगत्वास्नायकेशोभूत्वानुत्सारयेत्ततः गच्छ।
न्त्वस्मद्यो देवाःपिशाचायक्षराक्षसाः पितृभूतगणाःसर्वेक
रिष्येमलमोचनं अनेनैवपठित्वाचदत्वातालत्रयंशिवे उत्त
राभिमुखोभूत्वावस्त्रमाच्छादयेच्छिरः कर्णस्थब्रह्मसूत्रःसकु
र्यान्मलविमोचनं कृत्वामूत्रपुरीषेततोन्यत्रोपसंविशेत् मृ
दंत्रिधाविभागस्याभागमेकंप्रशस्तंच स्थूलामलकमानेनमृ

ह्रीं वा मृद्भिरादरात् शौचं कार्यं प्रयत्नेन गंधलेपक्षयावधि

पृ.
२४

पकालिंगे गुदे तिस्रः दशभिर्वामपाणिना उभयोः करयोः स

नपादयोस्तिस्त्रिरुच्यते इति शौचविधिः अथ दंतधावनवि

धिः ह्रीं वीजेन गंडूषान् त्रय कुर्यात्ततः परं अनिषिद्धदिने।

काष्ठं दंतान्मं शोधयेद्युक्त्वैव षष्ठ्यमाप्रतिपद्देवि दंतधावनवि

वर्जितं हस्तचंपककनेरककअपामार्गादि वा प्रिये अष्टादशां वा

दशांवा सुअगुलं प्राश्नीतं हरेत् आयुर्बलं यशो वर्चः प्रजोपशु।

24

यनानिव ब्रह्मप्रज्ञां च मेधां च तन्नो देहि वनस्पते अनेन वन
स्पतिं प्रार्थ्य गृहीत्वा दंतधावनं ॐ ऐं क्लीं तडि[illegible]हेति मंत्रेण।
छेदयेद्विवे ॐ क्लीं कामदेवाय सर्वजनप्रियाय नमः इति मंत्रे
ण दंतान्संशोध्य वाग्भवेन जिह्वामुल्लिख्य दंतकाष्ठं तत्क्षालये
नैऋत्यां शुद्धदेशे तु दंतकाष्ठं च निःक्षिपेत् मुखं मूलेन प्रक्षाल्य
त्रिराचम्य परं शिवे प्रथमकूटं आत्मतत्वाय स्वाहा द्वितीयकूटं
विद्यातत्वाय स्वाहा तृतीयकूटं शिवतत्वाय स्वाहा इति त्रिराचम्य

पृ. देवस्यानान्निर्माल्यमपसार्यनदीस्नानंव्रजेत्ततः इतिप्रातः।
२५ कृत्यविधिः अथस्नानविधिः मृत्तिकांशोधयेद्यथा अस्त्रेणा
भिसंमन्त्र्यतेनैवप्रोक्षयेच्छिवे शिवामंत्रेणसंशोध्यमूलेनैवा।
भिमंत्रयेत् जलेचैकांद्वादशभानिक्षिपेदस्त्रमुच्चरन् एकांमू
र्धादिनाभ्यंतंपठन्मूलंविलेपयेत् शेषंपादादिनाभ्यंतंपठन्मू
लंविलेपयेत् नाभिमात्रोदकेगत्वासंकल्पंकारयेत्ततः स्वशा
खोक्तविधिनावैदिकस्नानंचविधाय नाभिमात्रजलेस्थित्वा

25

ॐ अद्य तावत्तिथावद्याऽमुकमासस्याऽमुकपक्षस्य तिथावमु
कायाममुकनक्षत्रेऽमुकशर्माहं श्रीपरदेवताप्रीत्यर्थं तांत्रिक
स्नानमहं करिष्ये इति कुशाक्षतमिश्रजलेनार्घ्यपाद्यादिना
संकल्प्य प्राणायामं कृत्वा स्वमूलऋष्यादिकरषडंगन्यासं
श्च कृत्वा स्वपुरतो जले हस्तमात्रं चतुरस्रं तीर्थं परिकल्प्य त्रि
कोणचक्रं विलिख्य ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे
तेन सत्येन देवेश तीर्थान्देहि दिवाकर इति सूर्यात्तीर्थं प्रार्थ्य

26

पू. क्रोंइत्यंकुशमुद्रयासूर्यमंडलंभित्वा ॐगंगेचयमुनेचैवगो
२९ दावरिसरस्वति नर्मदेसिंधुकावेरिजलेस्मिन्सन्निधिंकुरु आ
वाहयामित्वांदेविस्नानार्थमिहसुंदरि पद्मिगंगेनमस्तुभ्यंस
26 र्वतीर्थसमन्विते इतिसूर्यमंडलात्तीर्थमाकृष्य पुरःकल्पित
तीर्थेसंयोज्य पुनःसूर्यमंडलादेव ॐ ह्रांह्रींह्रूंह्रैंह्रौंह्रः सा
र्वानंदमयेतीर्थशक्तिएह्येहिस्वाहा इतितीर्थशक्तिमावाह्य
तस्मिंस्तीर्थमंडलेतांध्यायेत् ॐसर्वानंदमयीमशेषदुरित

स०
२७
27

त्वात्मनेनमः ४ द्वितीयकूटं विद्यातत्वात्मनेनमः ४ तृतीयकू
टं शिवतत्वात्मनेनमः इतितत्वत्रयं विन्यस्य तत्रश्रीचक्रं विभा
व्य हृदयकमलाद्देवीमावाह्य षडंगेनसकलीकृत्य ॐ ह्रीं
श्रीत्रिपुरेदेविपरिवारसमन्विते त्वांस्नापयामितीर्थेस्मिन्नम
नमूर्तेनमोस्तुते इतिमंत्रेणतांसावरणांस्नपयित्वा योनिमु
द्रयामूलेनतज्जलमष्टधाभिमंत्र्य तत्रदेवतास्मरणपूर्वकंत्रि
र्मज्जोन्मज्ज्य ॐ भगमुद्रयामूलविद्ययास्वशिरसित्रिरभिषिच्य

मूलेन श्रीदेवीं संतर्प्य देवीं स्वहृदि समानीय ॐ प्रथमकू
टं आत्मतत्त्वं शोधयामि स्वाहा ॐ द्वितीयकूटं विद्यातत्त्वं शोध
यामि स्वाहा ॐ तृतीयकूटं शिवतत्त्वं शोधयामि स्वाहा इति त्रि
राचम्य तत्र विधिवत् स्नात्वा सकलीकृत्य मनसा संपूज्य ॐ भस्तु
द्र्यास देवतामावाह्य तां त्रिरभिषिच्य श्रवणादि समच्छिद्रा
णि संरुध्य निमज्योन्मजेत् मृत्तिकाया मूलेन ललाटे त्रिपुण्ड्रं
कुर्यात् मूलेन वस्त्रजलेन शोधयेत् ततो मूलेन त्रैः देवीं संतर्प्य

28

सू.
१८
78

तीरमारुह्य धौतवाससी परिधाय वैदिकसंध्यां समाप्य तां
त्रिकीं मारभेत् इति स्नानविधिः अथ संध्या सौंः सकलह्रीं।
अस्त्राय फट् इत्यस्त्रमंत्रेण आत्मनश्चतुर्दिक्षु जलं क्षिप्त्वा वह्नि
प्राकारं ध्यात्वा ऊर्ध्वस्रुताजुसारेण शिवानंदेन योगिना पूर्णा
भिषेकयुक्तायां महासंध्या विधीयते संध्या च त्रिविधा ज्ञेया बा
ला कौमार यौवना प्रौढा च निष्कला चेति संध्यादेवि प्रकीर्तिता
प्रातः काले महादेवि विद्या वागीश्वरी तथा कामेश्वरी च मध्याह्ने

सायाह्नेत्रिपुरेश्वरी अर्धरात्रेमहादेवि ज्ञेयात्रिपुरसुंदरी सं
ध्याहीनोन्यसंध्यायांएवंसंध्याक्रियामथ विधायोत्तरसंध्या
याःक्रियांकुर्यात्समाहितः प्राङ्मुखस्सुसमाविश्यपादौहा
स्तौप्रक्षालयेत् ऐंप्रथमकूटंआत्मतत्त्वायस्वाहा क्लींद्विती
यकूटंविद्यातत्त्वायस्वाहा सौःतृतीयकूटंशिवतत्त्वायस्वाहा
इतित्रिराचम्य ॐमणिधरिवज्रिणिमहाप्रतिसरेरक्ष२हुंफट्
स्वाहा इतिमंत्रेणशिखांबद्ध्वा ॐह्रींसः इतिमंत्रेणयज्ञोपवी

29

प्र.
२५
29

तंदक्षभुजेनिधाय मूलेनत्रिखंडंबद्ध्वा प्राणायामऋष्यादि
करषडंगन्यासान्विधाय स्वपुरतोयेत्रमुद्रया तत्रैवरचितं
तीर्थजलमस्तीकृत्य मूलेनाष्टधाभिमंत्र्य तेनजलेनतत्त्वमु
द्रया ॐअंनमः इत्यादिक्षकारांतैःमातृकाक्षरैःस्वशिरःप्रोक्ष्य
मूलेनचत्रिःप्रोक्ष्य दक्षहस्तेजलमादाय वामहस्तेनाछाद्य लं
वंरंयंहं इतिपांचभौतिकैर्मंत्रैःसप्तवारमभिमंत्र्य मूलेनचत्रिर
भिमंत्र्य तज्जलबिंदुभिर्वामहस्तस्थततत्त्वमुद्रयामूलेनस्वशि

रः त्रिः प्रोक्ष्याऽवशिष्टजलं वामहस्ते निधाय तेजोरूपं तज्ज
लमिडयाकृष्य स्वदेहान्तःस्थितं सकलकल्मषं प्रक्षाल्य त
ज्जलं कृष्णवर्णं पिंगलया वहिर्गतं मत्वा पुनर्दक्षहस्ते कृत्वा
स्ववामभागे ज्वलद्वज्रशिलां ध्यात्वा ॐ श्रीं पशु हूं फट् इति।
पाशुपातास्त्रमन्त्रेण तस्यां शिलायामास्फाल्य हस्तौ प्रक्षाल्य
मूलेन जलमादाय प्रवहन्त्याऽऽसहस्रदलपरमामृतेनैकी
भूतं विभाव्य निर्गमय्य तेन जलेन अमृतमालिन्यै स्वाहा इति

30

पू.
३०

30

मंत्रेणऊर्ध्वेः स्वशिरस्त्रिःप्रोक्ष्य ॐ प्रथमकूटं आत्मतत्त्वं शो।
धयामि स्वाहा ॐ द्वितीयकूटं विद्यातत्त्वं शोधयामि स्वाहा ॐ तृ
तीयकूटं शिवतत्त्वं शोधयामि स्वाहा पुनः ॐ तृतीयं शिवत
त्त्वं शोधयामि स्वाहा ॐ द्वितीयकूटं विद्यातत्त्वं शोधयामि स्वा।
हा ॐ प्रथमकूटं आत्मतत्त्वं शोधयामि स्वाहा ॐ सर्वमूलं सर्वं।
तत्त्वं शोधयामि स्वाहा इति त्रिराचम्य इति नवधाजलेनाचम्य
पीतांपीनांवरांपीतस्रग्विभूषानुलेपनः तडित्कोटिसमाभा

सांवालामलसमुज्वलां इतिप्रातःसंध्या जलमंजलिना

दायोत्थाय ॐ ऐंप्रथमेवागीश्वरिविद्महे क्लींद्वितीयंकामे

श्वरिधीमहि सौंःतृतीयंतन्नःशक्तिःप्रचोदयात् श्रीमहा।

त्रिपुरसुंदरीश्रीपादुकायैअर्घ्यंःस्वाहा इतित्रिरर्घ्यंदत्वा

ॐहंस्रांह्रींहंसःश्रीसूर्यअर्घ्यंतेःस्वाहा ऐंह्रींश्रींह्रांह्रींसःमा

र्तंडभैरवायप्रकाशशक्तिसहितायग्रहराशिनक्षत्रयोगकर

णपरिवारसहितायइदमर्घ्यंस्वाहा इतिकुलसूर्यायार्घ्यंदत्वा

31

ए०
३१

31

मूलं देवीं त्रिः संतर्प्य श्रीसूर्यं च त्रिः संतर्प्य मूलाधारे प्रथमं
कूटं मूलादिब्रह्मरंध्रांतं ध्यात्वा आकाशस्थवह्निमंडले समा
वास्य तत्र वालां वागीश्वरीं ध्यात्वा ऐं त्रिपुरे देवि विद्महे वा
गीश्वरि धीमहि तन्नो शक्तिः प्रचोदयात् इत्यनया मूलदे
व्यै त्रिरर्घ्यं दत्वा त्रिः संतर्प्य श्रीगुरुं प्रणम्य प्राणायामऋ
ष्यादिकरषडंगन्यासपूर्वकं एवं क्रमो मूलगायत्रीं जप्त्वा प्र
थमकूटमपि जप्त्वा मूलमपि यथाशक्ति जप्त्वा प्राणायामा

दिनाजपंदेव्यैसमर्प्य सूर्यमंडलान्मूलदेवीमूलादिवह्निमं
डलाचवागीश्वरींस्वकूटसहितांमूलाधारेविसृज्य श्रीगुरुंप्र
णम्य इतिप्रातःसंध्याविधिः अथमध्याह्नसंध्या प्रातःप्राणा
यामादिसूर्यतर्पणांतंप्रातःसंध्यावदेवविधाय वीजसंध्यां।
कुर्यात् तत्रमध्याह्नेअनाहतचक्रेमूलविद्यायाद्वितीयकूटं
रक्तवर्णंध्यायन्स्तत्तेजोवहिःसूर्यमंडलेसमावाह्य तत्रकामे
श्वरींयौवनरूपांध्यात्वा रक्तांस्वरक्तावरभूषणांपाशां

32

पृ० ३२

ऊष्माभीतिवरादयानां सुविस्मितां मुङ्घटयौवनाद्यांकामे
श्वरींसंस्मरतत्रिनेत्रां इतिमध्याह्नेध्यात्वा क्लींत्रिपुरेदेवि
विद्महे कामेश्वरिधीमहि तन्नःक्लिन्नाप्रचोदयात् इत्य
नयादेव्यैअर्घ्यंदत्वा एनांयथाशक्तिजप्त्वा तरीयांमूलगा
यत्रीमपित्रिर्जप्त्वा द्वितीयकूटंमूलमपियथाशक्तिजप्त्वा
प्राणायामादिपूर्वकंजपंसमर्प्य प्रणम्य मूलदेवींकामे।
श्वरींचस्वहृदिविसृज्य श्रीगुरुंप्रणम्य इतिमध्याह्नसंध्या

अथ सायंसंध्या तत्र प्राणायामादि सूर्यतर्पणांतं प्रातः।
संध्यावदेव विधाय बीजसंध्यां कुर्यात् तत्र सायं आज्ञा
चक्रे मूलविद्यायाः तृतीयं कूटं शुद्धस्फटिकनिर्मलं आ
काशाख्यसोममंडले समावाह्य तत्र अमृतेश्वरीं प्रौढां
ध्यात्वा शुक्लां शुक्लांबरालेपस्रग्विभूषाविभूषितां जटा
जूटयतां नेत्रत्रयोद्भासिमुखांभोजां ईषत्स्फुरितदंष्ट्रां च भैर
वीरूपमास्थितां जरापलितसंकीर्णां लंबमानपयोधरां पा

ए०

३३

प्रांऊंपौंपुस्तकंचस्फटिकाक्षस्रजंकरैः दधानांशक्तिबीजो
ल्यांऐऐंह्रींमेंडस्लेस्थितां इतिसायंध्यात्वा सौः त्रिपुरेदेविवि
द्महे शक्तीश्वरिधीमहि तन्नोऽमृतेप्रचोदयात् इत्यनयार्घ्यंद
त्वा तुरीयगायत्रीमेनांगायत्रींचयथाशक्तिस्तृतीयकूटं
मूलविद्यांचजप्त्वा प्राणायामादिपूर्वकंजपंसमर्प्य सोमम
ण्डलान्मूलदेवींहृदि अमृतेश्वरींचअात्ताचक्रेसमानीय
श्रीगुरुंप्रणम्य इतिसायंसंध्या अथार्धरात्रसंध्या तत्र अर्के

33

मंडलेदेवीध्यानंविनाप्राणायामाद्याचमनपर्यंतंपूर्ववं
द्विधाय सहस्रारेतुरीयवीजंमूलविद्यात्रयोदशाक्षररू
पंपद्मरागप्रभंध्यात्वा वह्निस्तारामंडलेसमावाह्य तत्र
भगवतीयथोक्तरूपांध्यात्वा तुरीयवीजेनसहतुरीय।
गायत्र्या तत्रमूलदेव्यैअर्घ्यंदत्वा त्रयोदशाक्षररूपंतुरीय।
कूटंजप्त्वा तुरीयगायत्रींमूलविद्यांयथाशक्तिजप्त्वा जपं
समर्प्य स्वदेवींहृदिसहस्रारेचतुरीयदेवींविसृज्य श्रीगुरुं

34

ए.
३४

प्रणम्य कामकलारूपमात्मानं ध्यायेत् इति तुरीयसं।
ध्याविधिः एतत्संध्याचतुष्टयमावश्यकं कार्यं अथवा।
प्रातरेव चतुष्टयं कार्यं केवलैव प्रातःसंध्या कार्या तां नम
जेदिति शिवासनं स्नानं संध्याचमं लोप्य जपेदष्टोत्तरश
तमिति इति संध्याविधिः अथ तर्पणविधिः एवं वद्धाच
म्य देवि प्राणायामत्रयं परं ऋष्यादिकरषडंगानि न्यासं ऊ
यीन्नतःपरं एवं वर्णोर्ध्वमारुह्य मूलेनामृतं विभाव्य च

तस्मिन्नुज्वले स्नायकेषाः यंत्रे ध्यात्वा ततः शिवे तस्मिं देवीस
मावाह्यस्वहृदयात्परिवारकः षडंगेन सकरीपरमोक्तम्
कुंडलिनीप्रयोगेनामृतेनपरिवारदेवतास्तर्पयेद्यथा
कामीश्वरीनित्यात्तर्प्यतां भगमालिनीनित्यात्तर्प्यतां नित्य।
क्लिन्नानित्यात्व· भेरुंडानित्यात्व· वह्निवासिनीनित्या· वज्रेश्व
रीनित्या· शिवदूतीनित्या· त्वरितानित्या कुलसुंदरीनित्या·
नित्यानित्या· नीलपताकानित्या· विजयानित्या· सर्वमंग

35

ए॰ ३५

लानित्या॰ ज्वालामालिनीनित्या॰ चित्रानित्या॰ त्रिपुरानित्या॰
परप्रकाशानंदनाथश्री॰ परशिवानंदनाथश्री॰ परशक्ति
देव्यंबाश्री॰ कौलेश्वरानंदनाथश्री॰ ऊलेश्वरानंदनाथश्री॰
कामेश्वरीदेव्यंबाश्री॰ शुक्लादेव्यंबाश्री॰ दिव्यौघगुरुश्री॰ भो
गानंदनाथश्री॰ क्लिन्नानंदनाथश्री॰ समयानंदनाथश्री॰
सहजानंदनाथश्री॰ सिद्धौघगुरुश्री॰ गगनानंदनाथश्री
पा॰ विश्वानंदनाथश्री॰ विमलानंदनाथश्री सदानंदना

3B

थस्ल॰ भुवनानंदनाथस्ल॰ लीलानंदनाथस्ल॰ स्वात्माने
वनाथस्ल॰ प्रियानंदनाथस्ल॰ मानवौघगुरुश्रीमच्छ्रीस्वा
मिप्रतापकौलानंदनाथस्ल॰ परमगुरुस्ल॰ परापरगुरुस्ल
प्यंता परमेष्ठिगुरुस्ल॰ सर्वज्ञाहृदयशक्तिस्लप्प॰ नित्य
तृप्ताशिरःशक्तिस्ल॰ अनादिबोधाशिखाशक्तिस्ल॰ स्वतंत्र
ताकवचशक्तिस्ल॰ नित्यमलुप्तानेत्रशक्तिस्ल अनंतास्त्रश
क्तिस्ल॰ अणिमासिद्धिस्ल॰ लघिमासिद्धिस्ल॰ महिमासिद्धि :

36

ए.
३९

36

ल्ह· ईशत्वसिद्धिल्ह· वशित्वसिद्धिल्ह· प्राकाम्यसिद्धिल्ह·
भुक्तिसिद्धिल्ह· इच्छासिद्धिल्ह· प्राप्तिसिद्धिल्ह· सर्वकामप्रदा
सिद्धिल्ह· ब्राह्मील्ह· माहेश्वरील्ह· कौमारील्ह· वैष्णवील्ह·
वाराहील्ह· इंद्राणील्ह· चामुंडाल्ह· महालक्ष्मील्ह· सर्वसंक्षो
भिणीमुद्राल्ह· सर्वविद्राविणीमुद्राल्ह· सर्वाकर्षिणीमुद्राल्ह·
सर्ववशंकरीमुद्राल्ह· सर्वोन्मादिनीमुद्राल्ह· महांकुशामुद्रा
ल्ह· खेचरीमुद्राल्ह· बीजमुद्राल्ह· योनिमुद्राल्ह· त्रिखंडमुद्राल्ह·

कामाकर्षिणीनित्याकलास्त्र· बुद्ध्याकर्षिणीनित्याकला
स्त्र· अहंकाराकर्षिणीनित्याकलास्त्र· शब्दाकर्षिणीनि
त्याकलास्त्रष्प· स्पर्शाकर्षिणीनित्याकलास्त्र· रूपाकर्षि
णीनित्याकलास्त्र· रसाकर्षिणीनित्यास्त्र· गंधाकर्षिणी
नित्याकलास्त्र· चित्ताकर्षिणीनित्याकलास्त्र· धैर्याकर्षि
णीनित्याकलास्त्र· स्मृत्याकर्षिणीनित्याकलास्त्र· नामाक
र्षिणीनित्याकलास्त्र· बीजाकर्षिणीनित्याकलास्त्र· आ

37

सू.
१२

त्माकर्षिणीनित्याकलाह्ल· अमृताकर्षिणीनित्याकला
ह्ल· शरीराकर्षिणीनित्याकलाह्ल· अनंगकुसुमाह्ल· अ
नंगमेखलाह्लण्वतां अनंगमदनाह्ल· अनंगमदनातुराह्ल·
अनंगरेखाह्ल· अनंगवेगिनीह्ल· अनंगांकुशाह्ल· अनंग
मालिनीह्ल· सर्वसंक्षोभिणीशक्तिह्ल· सर्वविद्राविणीशक्ति
ह्ल· सर्वाकर्षिणीशक्तिह्ल· सर्वाह्लादिनीशक्तिह्ल· सर्वसं
मोहिनीशक्तिह्ल· सर्वस्तंभिनीशक्तिह्ल· सर्वजृंभिणीश

37

क्तिस्त्व· सर्ववशंकरीशक्तिस्त्व· सर्वरंजिनीशक्तिस्त्व· सर्वो
न्मादिनीशक्तिस्त्व· सर्वार्थसाधनीशक्तिस्त्व· सर्वसंपत्प्रदा
यिनीशक्तिस्त्व· सर्वमंत्रमयीशक्तिस्त्व· सर्वद्वंद्वक्षयंकरीश
क्तिस्त्व· सर्वसिद्धिप्रदादेवीत्व· सर्वसंपत्प्रदादेवीस्त्व· सर्वप्रि
यंकरीदेवीस्त्व· सर्वमंगलकारिणीदेवीत्व· सर्वकामप्रदादे
वीत्व· सर्वदुःखविमोचिनीदेवीत्व· सर्वमृत्युप्रशमनीदेवीत्व·
सर्वविघ्नविनाशिनीदेवीत्व· सर्वांगसुंदरीदेवीत्व· सर्वसौभा

ह्र॰
३८

38

गप्रदायिनीदेवीत्र॰ सर्वज्ञादेवीत्र॰ सर्वशक्तिदेवीत्र॰ सर्वै
श्यप्रदादेवीत्र॰ सर्वज्ञानमयीदेवीत्र॰ सर्वव्याधिविनाशि
नीदेवीत्र॰ सर्वाधारस्वरूपादेवीत्र॰ सर्वपापहरादेवीत्र॰
सर्वानंदमयीदेवीत्र॰ सर्वरक्षास्वरूपिणीदेवीत्र॰ सर्वेप्सित
फलप्रदादेवीत्र॰ वशिनीवाग्देवताम्र॰ कामेश्वरीवाग्देवता
म्र॰ मोहिनीवाग्देवतात्र॰ विमलावाग्देवतात्र॰ अरुणावा
ग्देवतात्र॰ जयिनीवाग्देवतात्र॰ सर्वेश्वरीवाग्देवतात्र॰ कौलि

नीवाग्देवताम्बा॰ जृंभणकामेश्वरवाणदेवताम्बा॰ जृंभण।
कामेश्वरीवाणदेवताम्बा॰ मोहनकामेश्वरचापदेवताम्बा मो
हनकामेश्वरीचापदेवताम्बा॰ वशीकरणकामेश्वरपाशदे
वताम्बा॰ वशीकरणकामेश्वरीपाशदेवताम्बा॰ स्तंभनकामे
श्वरांकुशदेवताम्बा॰ स्तंभनकामेश्वर्यंकुशदेवताम्बा॰ इच्छा
शक्त्यात्मके रुद्रात्मशक्ति श्रीकामेश्वरीदेवीम्बा॰ ज्ञानशक्त्या
त्मके विष्ण्वात्मशक्ति श्रीवज्रेश्वरीदेवीम्बा॰ क्रियाशक्त्यात्मके।

39

ए॰
३५

ब्रह्मशक्तिश्रीभगमालिनीदेवीतृ॰ परब्रह्मस्वरूपिणीम
हाशक्तिस्तृ॰ सर्वमंत्रेश्वरीतृ॰ सर्वविद्येश्वरीतृ॰ सर्वपीठेश्व
रीतृ॰ सर्ववीरेश्वरीतृ॰ सर्वयोगेश्वरीतृ॰ सर्ववागीश्वरीतृ॰
सर्वसिद्धीश्वरीतृ॰ श्रीमहाषोडशीदेवीतृ॰ इंद्रशक्तिस्तृ॰ अ
ग्निशक्तिस्तृ॰ यमशक्तिस्तृ॰ नैर्ऋतिशक्तिस्तृ॰ वरुणशक्तिस्तृ॰
वायुशक्तिस्तृ॰ सोमशक्तिस्तृ॰ ईशानशक्तिस्तृ॰ ब्रह्मशक्तिस्तृ॰
अनंतशक्तिस्तृ॰ वज्रशक्तिस्तृ॰ शक्तिशक्तिस्तृ॰ दंडशक्तिस्तृ॰

खड्गशक्तिस्त· पाशशक्तिस्त· ध्वजशक्तिस्त· अङ्कुशशक्ति
स्त· गदाशक्तिस्त· त्रिशूलशक्तिस्त· पद्मशक्तिस्त· चक्रश
क्तिस्त· इतिपरिवारदेवताः संतर्प्य ऐशाने ॐ श्रीमद्व्री।
अमुकानंदनाथश्रीगुरुपादुकांस्त· वह्नौ ॐ परमगुरुश्रीपा
दुकांस्त· नैर्ऋते ॐ परमेष्ठिगुरुश्रीपादुकांस्त· वायव्ये ॐ
परमाचार्यगुरुश्रीपादुकांस्त· तीर्थं च स्वस्थाने विसृज्य प्रा
णायामादि एवं कं जपं समर्प्य श्रीदेवीं स्वहृदि स्थापयेत् इति

40

पू.
४.
40

तर्पणविधिः ततउत्थाय ॐवज्रोदकेनऊंफट्स्वाहा इत्य
नेनजलऊंभंगृहीत्वा ॐह्रींविशुद्धपापानिशमयाशेषंवि
कल्पमपनयहूं इतिहस्तौपादौप्रक्षाल्य मौनीमूलंस्मरा
न्यागगेहमागत्य वक्ष्यमाणक्रमेणसामान्यार्घ्योदकेन
तद्द्वारदेवताःपूजयेत् ॐस्वयाणीवचतुष्टयायनमः ॐ
श्रीं इत्यादिद्वांतः नवखंडविराजितायनवरत्नमयद्वीपा
यनमः ॐ नंदनोद्यानायनमः ॐ स्वर्णप्राकारायनमः ता।

द्वारस्यदक्षोत्तरशाखयोरुपर्यधश्च ॐगंगणपतयेनमः
दक्षे ॐक्षंक्षेत्रपालायनमः वामे ॐ ह्रांद्वारश्रियैनमः उपरि
ॐदंदेहल्यैनमः अधः ॐ कंदंवकाननायनमः ॐरत्नमंड
पायनमः ॐवाराह्यैनमः इतिसंपूज्य द्वारोर्ध्वशाखायां द
क्षिणे ॐमांमहालक्ष्म्यैनमः वामे ॐ सांसरस्वत्यैनमः मध्ये
ॐदुंदुर्गायैनमः अधः ॐह्रांद्वारश्रियैनमः द्वारस्यदक्षवाम
शाखयोरधोधः ॐ शंशंखनिधिवसुधाराभ्यांनमः ॐगंगण

ए.
४१

41

पतयेनमः ॐ क्षंक्षेत्रपालायनमः ॐ मांमायायैनमः ॐ विं
चिल्लक्ष्म्यैनमः ॐ गंगंगायैनमः ॐ यंयमुनायैनमः ॐ यां
याम्यैनमः ॐ विंविधात्रेनमः ॐ दांदेहल्यैनमः द्वाराग्रे ॐ
वंवरुणायनमः इतिपश्चिमद्वारे उत्तरेऊर्ध्वशाखायांश्री
गवन्महालक्ष्मीमहासरस्वत्यादिदेहल्यंतसंपूज्य मध्ये ॐ वं
टुकायनमः ॐ द्वांद्वारश्रियैनमः ॐ संसोमायनमः पूर्वद्वा
रे ॐ लंलेंद्रायनमः ॐ क्लींग्लौंगणनाथायनमः ॐ द्वांद्वारश्रि

येनमः ततोदक्षिणद्वाराये अर्घोदकेनाभ्युक्ष्य महालक्ष्मी
सरस्वतीगणनाथद्वारश्रीशंखनिधिदेहल्यन्तेसंपूज्य ॐ टं
यमायनमः पुनःपश्चिमद्वारंगत्वा ॐ रत्नसोपानपंक्तये
नमः तामारुह्य ऐंनमोभगवतिमाहेश्वरिपशुजनमनश्च
क्षुः तिरस्करणंकुरुकुरुस्वाहा तिरस्करणीश्रीपादुकांपूज
यामिनमः इतिसंपूज्य पालितंवलिरिंद्राद्यैःपरमैश्वर्यशो
भितं प्रपद्येपश्चिमंद्वारंभवान्यामंदिरंमहत् इतिध्यात्वा

पू०
४२
42

पश्चिमद्वाराय मणिमंडपाय नमः पश्चिद्वाराग्रे किंचिद्दक्षि
यग्रेषु ॐ गौं गौरीदेवी श्रीपादुकां पू० ॐ लों लोकधात्रीदेवी श्री
पादुकां पू० ॐ वां वागीश्वरीदेवी श्रीपादुकां पू० ततस्तत्रैव ॐ दिं
दिव्यौघ श्रीपादुकां पू० ॐ सिं सिद्धौघ श्रीपादुकां पू० ॐ मां मानवौ
घ श्रीपादुकां पू० ततः उत्तरद्वारं गत्वा तत्रैवाभ्यर्च्य ॐ मां माया
श्रीपादुकां पू० ॐ डं डुर्गा श्रीपादुकां पू० ततः पुनः पूर्ववज्ज्ञोयोदि
पूजनं ततः पूर्ववद्द्वारदक्षिणवामभागयोः ॐ भं भद्रकाली

श्रीपादुकां पू० ऐं स्वस्तिश्रीपादुकां पू० ततः पूर्ववज्जैर्या त
तो दक्षिणद्वारं गत्वा तस्य दक्षिणवामभागयोः ऐं स्वांस्वाहा।
श्रीपादुकां पू० ऐं शुभंकरी श्रीपादुकां पू० ततः पूर्ववज्जै
र्यादि ततः पश्चिमद्वारं गत्वा इति मंडपं संपूज्य तालत्रयपू
र्वकं तद्द्वारमारुह्य ॐ नीलरत्नरगमयिरुह्यस्तशोभमानानी
लोष्णुकाभरणमाल्यविभूषणाढ्या निद्रापटेन भुवनानि ति
रोदधाना खड्गायुधा भगवती परिपातु चास्मात् ततः सिद्धार्था

43

प्र.
४१

43

ततोदिक्षुसमानीतानाराचास्त्रयोगेनगृहीत्वा ॐ अपक्रामं
तुभूतानिपिशाचाःप्रेतगुह्यकाः येचात्रनिवसंत्येतेदेव
ताभुविसंस्थिताः अपसर्पंतु तेभूतायेभूताभुविसंस्थि
ताः येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया अस्त्रमंत्रसु
द्ध्यर्थं मंडपांतःप्रोक्ष्य तस्मान्निर्गतानांविघ्नानांस्वधामांग
संकोचेनमार्गंदत्वा ॐ पाषंडकारिणोभूताभूमौयेचांतरि
क्षगाः दिविलोकेस्थितायेचतेनश्यंतुशिवाज्ञया अस्त्रे

ण वामपार्ष्णिघातत्रयेण दिव्यदृष्ट्या च भौमान्तरिक्षदिव्या
न्विघ्नानुत्सार्य वामपादपुरःसरं मण्डपान्तः प्रविशेत् तत्रैव
स्त्रेण द्वारमाच्छाद्य घण्टावादनपूर्वकं ह्रौं इति मन्त्रेण मन्त्रितपं
चगव्यार्घ्यतोयाभ्यामस्त्राय फडिति मण्डपान्तं प्रोक्ष्य नानाव
र्णरञ्जितैः पुष्पमाल्यवितानाद्यैर्मण्डपमलंकृत्य लात्ता।
सिन्दूरादिभिर्भित्तिस्तम्भादिकमरुणीकृत्य वेदीपरि तस्मिन्र
स्थायिनः प्रदीपान्प्रज्वाल्य कालागुर्वादिभिर्धूपयित्वा तद

भावेनादृशं ध्यात्वा दीपं घृतयुतं दक्षे तैलयुक्तं च वामतः
दक्षिणे वसिता वर्त्ति वामतो रक्तवर्त्तिका ततो मंडपस्य नै
र्ऋते कोणे ॐ वास्तुपुरुषाय नमः ॐ वास्तुयोगेश्वराय ब्रह्म
णे नमः ईशाने कुलनाथाय श्रीपादुकां पूजयामि नमः ॐ
रक्तवर्णं द्वादशशक्तिसहितश्रीदीपनाथाय पादुकां पू
जयामीति दीपनाथं संपूज्य अस्मिन् क्षेत्रे दीपनाथ निर्विघ्न
सिद्धिहेतवे श्रीचक्रक्रमपूजार्थं मनुज्ञां दीयतां मयि

इति दीपनाथाज्ञां प्राप्य ततः पश्चिमादि ॐ द्वारदेवता
चतुष्टये मध्ये ॐ हृतर्यंबाश्रीपादुकां पूजयामि नमः ॐ
स्कंदर्यंबाश्रीपा० ॐ स्वस्त्यंबाश्रीपा० विद्रूपांबाश्रीपा० ॐ
विमलांबाश्रीपा० ॐ अतर्यंबाश्रीपा० ॐ पुरंदर्यंबाश्रीपा० ॐ
इति द्वारस्य वामदक्षिणयो द्वे द्वे शक्ती संपूज्य मध्ये ॐ गुष्मम
र्दिन्यै श्रीपा० इति पूजयेत् तीक्ष्णदंष्ट्रमहाकायकल्पांतद
हनोपम भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि इति भैरवा

45

न्तां स्रादाय अः फट् इति प्रजा वेदीगत्वा ॐ रक्ष २ हूं फट् स्वा
हा इति मंत्रेण भूमिं संप्रोक्ष्यासनानि यथाशिवे स्थंडु चूड।
कमासीनस्वान्येषु कमलेषु वा विष्टरेषु समासीनः स्वाय
येत्स्विहितसनतमं अर्वाक्रुषण्मासतो गर्भच्युतमारुढे फल्वयः
चूडोपनयनहीनं मृतं वा चूडकं विदुः निहृतं चूडाकरणो।
हीनोपनयनः पुमान् यो मृतं पंचमे वर्षे तमेव कोमलं विदुः
काम्यार्थं केवलं चैव श्रेष्ठं चारकं बलं कृष्णाजिने काम्य

सिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि कुशासनेमंत्रसिद्धिर्नात्रका।
र्याविचारणा धरण्यांदुःखसंभूतिर्दौर्भाग्यंदारुजासने वं
शासनेदारिद्र्यःस्यात्पाषाणेव्याधिपीडितः तृणासनेयशो
यानिःपल्लवेचित्तविभ्रमः जपध्यानतपोहानिःवस्त्रासने
नकारयेत् पंचाशत्कुशतोब्रह्मानदर्थेविष्टरःस्मृतः कुश
पत्रशतेनैवविष्टरंकारयेद्बुधः जीवन्यासंततःकुर्यात्तस्यो
परिजपंचरेत् बिंदुत्रिकोणवृत्तंचअष्टारंवृत्तमंडिते च

46

पु. ४८

46

तद्हस्तपरीमाणं चतुरस्रं कारयेत्ततः तस्योपर्यासनं।
स्थाप्य निर्भयः सर्वथा शुचिः निवेशात्तत्र सुद्धांतःकरणः
सजनं चरेत् आसनशोधनं कुर्याद्यथा ॐ अस्य श्री आ।
सनशोधनमंत्रस्य मेरुपृष्ठऋषिः सुतलं छंदः कूर्मो
देवता आं बीजं ह्रीं शक्तिः क्रों कीलकं आसनोपवेशने
विनियोगः अथ करषडंगन्यासः ह्रीं आं क्रों अंगुष्ठाभ्यां
नमः हृदयाय नमः आं ह्रीं क्रों तर्जनीभ्यां स्वाहा शिरसे

स्वाहा श्रां ह्रीं क्रीं मध्यमाभ्यां वषट् शिखायै वषट् श्रां ह्रीं
क्रीं अनामिकाभ्यां हुं कवचाय हुं श्रां ह्रीं क्रीं कनिष्ठिका-
भ्यां वौषट् नेत्रत्रयाय वौषट् श्रां ह्रीं क्रीं करतलकरपृष्ठा-
भ्यां फट् अस्त्राय फट् अथ ध्यानं ध्यायेत्कूर्मं महाविष्णुं।
सर्वाधारस्वरूपकं श्रीवत्सकौस्तुभं यस्य मायकस्थिति
कारकं दुष्टनिर्दारणपरं नीलवर्णं चतुर्भुजं शंखचक्रग
दापद्मकिरीटवनमालिकं एष्टस्थामिंदिरां ध्यायेत्सीतां।

47

पू.
४८

47

वरयुगाहृतां ह्रादिनी आमिनी शक्तियुतं देवि विचिंतयेत्
इति कृतांजलिं कृत्वा ॐ ऐं ह्रीं पृथ्वि त्वया धृता लोका देवि त्वं वि
ष्णुना धृता त्वं च धारय मां देवि पवित्रं कुरु चासने इति पृथ्वीं
प्रार्थ्य ॐ आं ह्रीं क्रौं धां धा चर्म सिंहासनाय नमः इत्यासनं
मूलेन वीक्ष्यास्त्रेण प्रोक्ष्यास्त्रेणैव कुशैस्त्रिः संताड्य कवचेना
भ्युक्ष्य ॐ ऐं शांताभिषेके शांताभिषेके हूं फट् स्वाहा ॐ ३ छ्यै।
केनराजाह्रीय सम्यक्तभायहूं ॐ ३ छ्ये ३ छ्यै महा ३ छ्यै स्व ३

क्षेपुष्पसंभवे पुष्पप्रचयाकीर्णे हूं फट् स्वाहा इतिमंत्रेण
पुष्पंसंशोध्य ततोगंधाक्षतपुष्पैः आसनंपूजयेत् ॐमंडू
कायनमः ॐकालाग्निरुद्रायनमः ॐमूलप्रकृत्यैनमः ॐ
आधारशक्त्यैनमः ॐकूर्मायनमः ॐअनंतायनमः ॐ वराहा
यनमः ॐपृथिव्यैनमः ॐइक्षुरससमुद्रायनमः ॐमदिरास
मुद्रायनमः ॐघृतसमुद्रायनमः ॐदुग्धसमुद्रायनमः ॐअ
कारादिक्षकारांतनवखंडविराजितायनवरत्नमयद्वीपाय

48

नमः ॐ अंआंइंईंउंऊंऋंॠं पुष्परत्नायः ॐ लृंॡंएंऐंओंऔंअं
अः वैडूर्यरत्नायनमः ॐ कं ॐ नीलरत्नायनमः ॐ चं ॐ वि
द्रुमरत्नायनमः ॐ टं ॐ मौक्तिकरत्नायनमः ॐ तं ॐ म
रकतरत्नायनमः ॐ पं ॐ वज्ररत्नायनमः ॐ यं ॐ गोमेदर
त्नायनमः ॐ शं ॐ पद्मरागरत्नायनमः ॐ स्वर्णपर्वताय
नमः ॐ नंदनोद्यानायनमः ॐ कल्पवृक्षेभ्योनमः ॐ वसं
तादिषड्ऋतुभ्योनमः ॐ महापद्मवनायनमः ॐ इंद्रिया

ष्ठेभ्योनमः ॐइंद्रियार्थगजेभ्योनमः ॐविचित्ररत्नभूमिका
येनमः ॐसहस्त्रारपद्मायनमः ॐप्रकृतिमयपत्रेभ्योनमः
ॐविकृतिमयकेसरेभ्योनमः ॐअष्टवीजभूषितकर्णिका।
येनमः ॐधर्मायनमः ॐज्ञानायनमः ॐवैराग्यायनमः ॐऐ
श्वर्यायनमः ॐअधर्मायनमः ॐअज्ञानायनमः ॐअवैराग्याय
नमः ॐअनैश्वर्यायनमः ॐसत्वायनमः ॐरंरजसेनमः ॐतं
तमसेनमः ॐआंआत्मनेनमः ॐअंअंतरात्मनेनमः ॐपंपर 47

ष्र.
४९

49

मात्मनेनमः ॐ ज्ञानात्मनेनमः ॐ महिषासनायनमः ॐ योग
पीठायनमः इत्यासनंसंपूज्य तत्रपद्मासनेप्राङ्मुखेवोद
ङ्मुखोपविश्य बुभुक्षुःप्राङ्मुखस्तिष्ठेन्मुमुक्षुश्चोत्तरामुखः
वश्यार्थेपश्चिमाशायांमारणेदक्षिणामुखः उच्चाटनेवायुमु
खोस्तंभनेनैर्ऋतेस्थितः स्वपुरतःश्रीचक्रंपीठोपरिसंस्थाप्य
ततःपुष्पांजलिंगृहीत्वा मूलमुच्चार्य समस्तप्रकटगुप्ततरसं
प्रदायकुलकौलनिगर्भरहस्यपरापररहस्यातिरहस्यसिद्ध

योगिनीचक्रेभ्योनमः इतिमंत्रेणपुष्पांजलिं श्रीचक्रोपरिनि
क्षिपेत् इतिसंपूज्य तत्रयथोक्तमासनमालोक्यास्त्रेणप्रोक्ष्य
ह्रींआधारशक्तिकमलासनायनमः इतिसंपूज्य आसनाग्नेये
ॐ गं गणपतयेनमः नैरृत्ये ॐ दुं दुर्गायनमः वायव्ये ॐ सं सरस्वत्यैनमः
ईशाने ॐ क्षं क्षेत्रपालायनमः इतिसंपूज्य तत्रपद्मासनेनो
पविश्य संविदं यथामंत्रेस्वीकुर्यात् तद्विधिरग्रेवक्ष्यति रक्त
गंधांबरस्रगाभरणभूषितस्त्रीहस्तात्परितमुखः कर्पूरसुग

ए. नाभिस्थवासितांगः हारकेयूरांकितशरीरः शिवोहमिति।
५० भावयन् गुरूपदिष्टविधिना श्रीचक्रं पुरतः संस्थाप्य यावज्जी
वं स्वर्णे स्याद्रूप्ये द्वाविंशतिः प्रिये ताम्रे द्वादशवर्षाणि भूर्जे
षाण्मासिकं स्मृतं मणिमुक्ताप्रवालाद्यं गंडकीप्रस्तरोद्भवं
प्रशस्तं सर्वकामार्थं सर्वकालं च स्फाटिकं समेरुं च सशोभाढ्यं
दीक्षितशिल्पिनिर्मितं एतेषामन्यतमतः कार्यं विज्ञानुसारतः
मूलेन षडंगं जलिं तिस्रा स्ववामाग्रे भूतेभ्यो नमः भूतवलिं दत्वा

50

भूतानियानीहवसंतभूतलेबलिंगृहीत्वाविधिवत्प्रयुक्तं
अन्यत्रवासंपरिकल्पयंतुतिष्ठंतुचान्यत्रनमोस्तुतेभ्यः ३
इतिभूतबलिंविसृज्य ॐ नेरे पक्षरूपंभक्षयंतंभक्तानांवैरि
सैन्यं शलभंरौद्ररूपंध्यायेदुत्तरदिग्गतमितिध्यात्वा
ॐ ॐ नमोभगवतेशलभशाल्वायपक्षिराजायममशत्रून्ना
शय २ ह्रीं घ घ हुं फट्स्वाहा श्रीशलभरुद्रश्रीपादुकांपू
जयामिनमः तद्वामे ॐ ॐ नमोभगवतिशलभशालिपक्षि

51

ए०
५१

5|

राजिममशत्रून्नाशय २ हूं फट् स्वाहा श्रीशलभीदेवीश्री
पादुकां पूजयामि नमः ॐ कल्पान्तार्कप्रकाशं त्रिभुवनम
खिलं तेजसा पूरयंतं रक्ताक्षं पिंगकेशं रिपुकुलभयदं भी
मदंष्ट्राट्टहासं शंखं चक्रं गदां च प्रथुतरमुसलं चापपाशां
कुशाद्यैर्बिभ्राणं दोर्भिराद्यं मनसि मुररिपुं भावयेच्चक्ररू
पं इति ध्यात्वा ॐ सहस्रार हूं फट् श्रीसुदर्शनास्त्राय नमः
इति पूर्वदिशि ॐ सजलघनसमानं भीमदंष्ट्रं त्रिनेत्रं भुजग

परमघोरं रक्तवस्त्रांगरागं पाशडमरुखड्गखेटकं वा
णपाशौ त्रिशिखनरकपालं विभ्रतं भावयामि इति ध्यात्वा
ॐ ह्रीं स्फुर २ प्रस्फुर २ घोर २ तनु २ रूप २ चट २ प्रचट २ कह   52
वम २ बंध २ घातय २ हूं फट् अघोररुद्रास्त्राय नमः इति द
क्षिणे ॐ सौवर्णीयुतमध्यगां त्रिनयनां सौदामिनीसन्निभां   52
शंखं चक्रवराभयानि दधतीमिंदोः कलां बिभ्रतीं ग्रैवेयांगद
हारकुंडलधरामाखंडलाद्यैः स्तुतां ध्यायेद्विंध्यनिवासिनीं

दु॰
५२

52

शशिसूर्यौ पार्श्वस्थं पंचाननाम् इतिवनदुर्गां ध्यात्वा ॐउ
त्तिष्ठपुरुषकिंस्वपिषिभयंमेसमुपस्थितंयदिशक्यमश
क्यंवातन्मेभगवतिशमयस्वाहा श्रीॐवनदुर्गायैनमः
इतिपश्चिमे वह्निस्थानात्संपूज्य स्वदत्तेगंधादिपूजोपकर
णेनिधाय स्ववामेजलद्रव्यादिकंसंस्थाप्य ह्रांह्रींह्रूंह्रैंह्रौंह्रः
फडितिस्मरन्नाराचमुद्रयादिव्यदृष्ट्यावगुण्ठ्यादिकंविलोक्य
वामभागस्थंजलपूर्णंकुंभंग्रामितिवामहस्तेनस्पृष्ट्वा ह्रौं

इति दत्तकराग्रेण तत्स्थं जलं च स्पृष्ट्वा रमिति दीपशिखां
च स्पृष्ट्वा करौ प्रक्षाल्य वामे ॐ ऐं गुरुपादुकाभ्यो नमः दक्षिणे
ॐ गं गणपतये नमः अग्रे ॐ ह्रीं परदेवतायै नमः इति प्रण
म्य मूर्ध्नि संघट्टमुद्रां विधाय ॐ ह्सौः सहक्षमलवरयां स
हक्षमलवयूं सहक्षमलवयीं ह्सौं श्रीपरपावकसर्वाराध्य
सर्वमूर्धपुरनाथ सर्वगुरुस्वयंगुरु श्रीगुरुनाथ रहसहक्ष
मलवयूं ह्सौं सहक्षमलवयीं सहक्षमलवयूं सहक्षम

पृ० ५३

53

लवयरीं श्रीं शें भ्रगुरु स्हौं सहक्षमलवयरूं श्रीमच्छ्रीस्वामि
प्रतापकौलनंदनाथ श्री पादुकां श्रीमच्छ्रीदयावत्यंबा श्री
पादुकां पूजयामि नमः इति शिरसि श्री गुरुपादुकां विन्य
स्य पुनरनयैव विद्यया गंधादिना स्वशिरसि श्रीगुरुं संपू।
ज्य गंधादिपंचमुद्राः प्रदर्श्य ॐ नमोस्तु गुरवे तस्मा यिष्टदेव
स्वरूपिणे यस्य वागमृतं हंति विषं संसारसंज्ञकं इति नमस्का
रमुद्रया प्रणम्य ॐ ग्रें ग्रों सौंः इति स्वगंधयक्ष्ममर्दनेन स्वाभी

कृत्वा स्वंगंपुष्पंदक्षकरेणमर्दयित्वावामकरेणाघ्राय
निक्षिप्य ॐ तेसर्वेविलयंयांतुयेमांहिंसंतिहिंसकाः मृ
त्युरोगभयक्लेशाःपतंतुरिपुमस्तके इतिमंत्रंपठित्वा ना
राचमुद्रयातत्पुष्पंपुनरस्यांदिशिहरेत्क्षिपेत् ततःपुनः
करशुद्धिविधयाकराववन्योन्यमर्दनेनसंशोध्य ॐ अंनमः म
ध्यमयोः ॐ ओंनमः अनामयोः ॐ सौंःनमःकनिष्ठकयोः ॐ अं
नमः अंगुष्ठयोः ॐ ओंनमःतर्जन्योः ॐ सौंःनमःकरतलकरए।

54.

पु०
५४

ष्ठयोः इति विन्यस्य ॐ ऐं ह्रीं श्रीं नमस्त्रिपुरसुंदरि मां रक्ष २
इति मूर्ध्यादिपादांतं त्रिर्व्यापकं विन्यस्य पुनरुच्चार्य कुर्वी
र्ध्वं तालत्रयं तर्जन्यंगुष्ठशब्देन दशदिग्बंधनं विधाय
त्रिशूलाकारयोर्वामयोः करयोः स्वमूर्धानं परितस्त्रिर्भ्रा
मणेन वह्निप्राकारत्रयं च कृत्वा प्राणायामत्रयं च विधाय
संवित्तशोधनं कुर्यात् तद्विधिर्यथा संविदासवयोर्मध्ये
संविदेव गरीयसी भक्तिता भवनाशाय निर्गेयावोधरूपिणी

स्रा पुनः संविदीशानि चतुर्धा कथिता शिवे ब्राह्मणी स्वेत
पुष्पा च क्षत्रियारक्त पुष्पिका पीत पुष्पा च वैश्या वै शूद्रा च।
कृष्ण पुष्पिका आनंदेन विना भ्रंशो न चलंष्यति देवता तत्र
विंदु त्रिकोण वृत्तं च चतुरस्त्रं कारयेत् ततः तस्योपरि ॐ ह्रीं
आधार शक्तये नमः अनेनासनं संपूज्य संविदं स्थापयेत् प्रि।
यीः तस्योपरि करं दत्वा मंत्रयेत् संविदं शिवे न्यासादिकं ततः
कुर्याद्दिग्बंधन पुरः सरं ॐ अस्य श्री विजया मंत्रस्य शिव।

55

प्र.
५५
55

ऋषिः त्रिष्टुप्छंदः श्रीविजयादेवता संविच्छोधनेवि।
नियोगः ध्यानं पाशांकुशौचापवरंचबाणं दोर्भिर्दधानां
सकलार्थदात्रीं दिव्यांबरांभूषणभूषितांचपद्मासनां
श्रीविजयांनमामि इतिध्यात्वा शोधनंकुर्यात् संविदेब्र
ह्मसंभूतेब्रह्मपुत्रिसदानघे ब्राह्मणानांचतृप्त्यर्थंपवित्रा
भवसर्वदा ॐऐंब्राह्मण्यैनमः स्वाहा इतिमंत्रेणब्राह्मींसंशो
ध्य ॐसिद्धमूलमुत्पत्येदेविहीनबोधप्रबोधिनि राजप्रजा

वशंकरि शत्रुपक्षनिसूदिनि ॐ पेंतत्रियायै नमः स्वाहा
इति मंत्रेण तत्रियां संशोध्य ॐ अनंतानंदनदीमाग्र ज्ञाना
ग्निज्वालास्वरूपिणि आनंदरूपाज्ञप्तिप्रीतिं मम ज्ञानं प्रयच्छ।
मे ह्रीं वैष्णायै नमः स्वाहा इति मंत्रेण वैष्णायं संशोध्य ॐ
नस्वामिनमस्वामि योगमार्गप्रदर्शिनि त्रैलोक्यविजये मा
तः समाधिफलदा भव ह्रीं ब्रह्मायै नमः स्वाहा इति मंत्रेण ब्र
ह्माणीं संशोध्य अथ वैकेन मंत्रेण सर्वास्ताः शोधयेत्सुधीः

पृ. ५६

56

इत्यभिमंत्र्य ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतमा
कर्षय २ सिद्धिं देहि श्रीमहात्रिपुरसुंदरीपदं मे वशमान
य स्वाहा इति तदुपरि सप्तधा मूलं च जप्त्वा आनंदेश्वरभैर
वं भैरवीं च सप्तधा जपेत् धेनुमुद्रया अमृतीकृत्य योनिं प्रद
र्श्य ह्रमित्यवगुंठ्य फडिति संरक्ष्य मूलेनागच्छ २ संतिष्ठ २
संनिधेहि २ संनिरुद्धस्व २ संमुखीभव मम सर्वोपचारस
हितां पूजां गृहाण २ स्वाहा इत्यावाहनादिमुद्राः संप्रदर्श्य

नालत्रयेणादिव्यहस्ताबामपार्श्वेयातत्रयेण च त्रिविध
विघ्नानुत्सार्य छोटिकाभिःफडितिदशदिग्बंधनंविधा।
य वामहस्तकृततत्त्वमुद्रया आदौभ्रूमध्ये आनंदेश्वरंभै
रवींचत्रिधासंतर्प्य ततोशिरसिस्वगुरुंत्रिवांरवासंतर्प्य स्व
हृदिपरदेवतांचसंतर्प्य संवित्स्वीकारंकुर्वीतयथा ऐंवद २
वाग्वादिनिममजिह्वाग्रेस्थिरीभवसर्वसत्ववशंकरिस्वाहा
इत्यनेनमन्त्रेणस्वीकुर्यात् ततआनंदमयोभूत्वा भूतशुद्धिं

57

भू०
५०

ॐ यथा गायत्र्यास्य श्रीभूतशुद्धिमहामंत्रस्य ब्रह्मऋषिः देवीगायत्रीछंदः आकाशवाय्वग्निजलभूमयो देवता हं यं रं लं वं बीजानि ममपांचभौतिकशरीरशोधनार्थे जपे विनियोगः अथ करषडंगन्यासः लं रं यं वं ॐ अतनुसूक्ष्माय भेदात्मने अंगुष्ठाभ्यां नमः हृदयाय नमः लं रं यं वं हं अव्यक्तप्रबोधात्मने तर्जनीभ्यां स्वाहा शिरसे स्वाहा लं रं यं वं हं अचिंत्यशक्त्यात्मने मध्यमाभ्यां वषट् शिखायै वषट्

लेंरेंयेंवेंहेंअनेंविद्यात्मनेअनामिकाभ्यांहुं कवचायहुं
लेंरेंयेंवेंहेंअभेद्यकवचात्मनेकनिष्ठिकाभ्यांवौषट् नेत्रत्र
यायवौषट् लेंरेंयेंवेंहेंअलभ्यगम्यात्मनेकरतलकरपृष्ठा
भ्यांफट् अस्त्रायफट् इतिकरषडंगः भूर्भुवःस्वरोमितिदि
ग्बंधः ध्यानं पांचभौतिकसंभूतं कलापंचकसंयुतं ब्रह्मा
दिपंचसंयुक्तंपंचीकरणवर्गकं पंचपंचात्मकमिदंशिव
रूपंतत्रंभजे इतिध्यानं पादादिजानुपर्यंतंपृथ्वीस्थाने

९४

चतुरस्रं वज्रलांछितं पीतवर्णं ब्रह्मदैवतं निवृत्तिकला
धिष्ठितं लं बीजयुतं ध्यात्वा जान्वादिनाभिपर्यंतं अपो
ध्याने शुक्लवर्णं अर्धचंद्राकारं शृंगद्वयेपि पद्मलांछितं
विष्णुदैवतं प्रतिष्ठाकलाधिष्ठितं वं बीजयुतं ध्यात्वा ना
भ्यादिकंठपर्यंतं वह्निमंडले स्वस्तिकोपेतं त्रिकोणाकारं
रक्तवर्णं रुद्रदैवतं विद्याकलाधिष्ठितं रं बीजयुतं ध्यात्वा
कंठादिभ्रूमध्यपर्यंतं वायुमंडले षट्कोणाकारं षट्बिं

ड लांछितं हृत्तोपेतं कृष्णवर्णं ईश्वरदैवतं शांतिकलाधि
ष्ठितं यं वीजयुतं ध्यात्वा भ्रूमध्यादिब्रह्मरंध्रांतं आकाश
स्थाने हृत्ताकारं ध्वजलांछितं धूम्रवर्णं सदाशिवदैवतं
शांत्यतीताकलाधिष्ठितं हं वीजयुतं ध्यात्वा तत्र पंचभूत
मये देहे पद्मकंदसमुद्भूतं ज्ञाननालकमैश्वर्याष्टदलोपे
तं परवैराग्यकर्णिकं स्वहृदयारविंदं ध्यात्वा तत्कर्णिका
यां जीवात्मानमाराग्रमात्रप्रदीपकलिकाभास्वरमनादि

अणिमा महिमा ल
घिमा गरिमा प्राप्तिः
प्राकाम्य ईशित्वं
वशित्वं ==

59

सू.
५९

59

मनःसंक्षत्रपरचिद्रूपंसंचिंत्य प्रागुक्तरूपेण मूलाधारा
त्कुंडलिनीमुत्थाप्य सुषुम्णावर्त्मना मूलाधाराद्यनाहतां
तस्थवर्णादिदेवताग्रसंतीं हृदयकमलमानीय तया
कवलीकृतं जीवात्मानं ध्यायन् सुषुम्णावर्त्मना विशु।
द्ध्यादिचक्रस्थवर्णाधिदेवताग्रसंतीं ब्रह्मरंध्रं नीत्वा तत्र।
स्थितसहस्रदलकमलकर्णिकामध्यवर्तिनि परमात्म
ज्योतिषि स्ववर्णवर्णदेवताकं देवकं जीवात्मानं हंस इति

मंत्रेणसंयोज्य कुंडलिनींस्वस्थानमानीय तत्वसंहारंकुर्या
त् तत्रपृथिवीस्थानेपादेंद्रियगमनक्रियागंतव्य गंधघ्रा
णपृथिवीब्रह्मनिवृत्तिसमानवायून्संस्मृत्य ॐ ह्रांब्रह्मणे
पृथिव्यधिपतयेनिवृत्तिकलात्मनेहुंफट्स्वाहा इतिमंत्रेण
तान्कुंडलिनीद्वाराऽपांमध्येसंहरेत् ततोऽप्स्थानेहस्तदा
नदातव्यरसरसनाजलविष्णुप्रतिष्ठोदानान्संचिंत्य ॐ ह्रीं
विष्णवेजलाधिपतयेप्रतिष्ठाकलात्मनेहुंफट्स्वाहा इति

१९.
६९.

60

तान्सर्वान्कुंडलिनीहारावह्निमध्येसंहरेत् ततोवह्निस्थाने
पायुविसर्गविसर्जनीयरूपचतुर्वह्निरुद्रविद्याख्यानान्संस्मृ
त्य ॐ ह्रूं रुद्रायतेजोधिपतयेविद्याकलात्मनेऽं फट् स्वाहा इ
तितान्सर्वान्वायुमंडलेसंहरेत् ततोवायुस्थानेउपस्थानंदत
ह्रिषयस्पर्शस्पृष्टव्यवाग्धीश्वरशांत्यऽपानान्संस्मृत्य ॐ ह्रैं ईश्वरा
यवाय्वधिपतयेशांतिकलात्मनेऽं फट् स्वाहा इतितान्सर्वा
नाकाशस्थानेसंहरेत् तत आकाशस्थानेवागवचनवक्तव्य

शब्दश्रोत्राकाशसदाशिवशांत्यतीताप्राणान्संस्थाप्य ओं
ह्रौं सदाशिवायाकाशाधिपतये शांत्यतीताकलात्मने ऊं
फट् स्वाहा इति तान्सर्वान्कुंडलिन्यां संस्थाप्य तां विंदुशक्तौ
विंदुशक्तिं नादशक्तौ नादशक्तिं परमशक्तौ प्रणवेन संस्था
प्य ओं ह्रौं ऊं फट् स्वाहा इति तां परमशक्तिं स्वींक्रपरमानि।
नियोज्य केवलशरीरे वामकुक्षौ पापपुरुषं चिंतयेद्यथा
ओं वामकुक्षिस्थितं पापपुरुषं कज्जलप्रभं ब्रह्महत्याशिरा।

61

ए.
५१

स्कंच स्वर्णस्तेयभुजद्वयं। सुरापानहृदायुक्तं गुरुतल्प।
कटिद्वयं तत्संसर्गिपदद्वंद्वमंगप्रत्यंगपातकं २ उपपात
करोमाणं रक्तश्मश्रुविलोचनं अधोमुखं कृष्णवर्णं अंगु
ष्टपरिमाणकं समस्ताभरणन्ताणां वर्धनं कल्मषात्मकं
खङ्गचर्मधरं क्रुद्धं पापौ कुक्षिविचिंतयेत् ४ इतिपापपुरुषं
विचिंत्य वामनासापुटेण यंवीजेन सहवायुमापूर्य नाभि।
स्थषट्कोणाकारे वायुमंडले संयोज्य तत्रयमितिवायुवीजं

धूम्रवर्णं संचिंत्य कुंभकेनयमितिवायुवीजमावर्तयेत्त
उत्थितेनमहावायुनास्वपापपुरुषंस्वशरीरस्थंसंशोष्य
वायुंदक्षिणनासयाविरेच्य पुनर्दक्षिणनासयारंवीजेनस
हवायुमापूर्य मूलाधारेसंयोज्य तत्रस्थवह्निमंडलेरमि।
तिवह्निवीजंरक्तवर्णंविचिंत्य कुंभकेनरमितिवीजमावर्त
येत्तउत्थितमहावह्निनास्वपापपुरुषंस्वशरीरस्थंसंदग्ध
पापपुरुषभस्मनासहितंवायुंवामनासयाविरेच्य पुनर्वा

62

प्र०
६२

62

वामपादांगुष्ठान्नाभिपर्यंते ॐ ऐं प्रथमकूटं कामेश्वर्यै नमः
नाभ्यादिकंठपर्यंतं क्लीं द्वितीयकूटं वज्रेश्वर्यै नमः कंठाच्छिरः
पर्यंतं सौः तृतीयकूटं भगमालिन्यै नमः इति वामभागे विन्यस्य
दक्षपादांगुष्ठान्नाभिपर्यंते ह्रीं आत्मतत्त्वाधिपतये ब्रह्मणे नमः

225

त्रि॰
२२५
225

नाभ्यादिकंठपर्यंतं ह्स्क्लीं विद्यातत्त्वाधिपतये विष्णवे नमः
कंठादिशिरोंतं ह्सौः शिवतत्त्वाधिपतये नमः इति दक्षभागे वि
न्यस्य इति कामेश्वर्यादिन्यासः अथ चक्रतत्त्वन्यासः नाभ्या
दिपादांतं ऐं प्रथमकूटं आत्मतत्त्वात्मने श्रीमहात्रिपुरसुंदर्यै
नमः कंठादिनाभ्यंतं ऐं द्वितीयकूटं विद्यातत्त्वात्मने श्रीमहात्रिपु
रसुंदर्यै नमः मूर्धादिकंठांतं ऐं तृतीयकूटं शिवतत्त्वात्मने श्री
महात्रिपुरसुंदर्यै नमः सर्वांगे ऐं तुरीयविद्या सर्वतत्त्वात्मने श्री

महात्रिपुरसुंदर्यैनमः इतिचतुरस्रन्यासः अथमूलविद्यान्या

सः मूलाधारे ॐप्रथमकूटंनमः हृदि ॐद्वितीयकूटंनमः भ्रू

मध्ये ॐतृतीयकूटंनमः सर्वांगे ॐतुरीयंविद्यात्रयविन्यस्य प्राग्व

त्समस्तविद्यांव्यापकंकुर्यात् इतिमूलविद्यान्यासः अथनवयोनि

न्यासः वामकर्णे ॐऐंनमः दक्षकर्णे ॐक्लींनमः चिबुके ॐसौंःन

मः वामशंखे ॐऐंनमः दक्षशंखे ॐक्लींनमः मुखे ॐसौंःनमः वाम

नेत्रे ॐऐंनमः दक्षनेत्रे ॐक्लींनमः नासाग्रे सौंःनमः वामांसे ॐऐं

226

ए.
२२६

नमः दक्षांसे ॐक्लींनमः हृदये ॐसौंःनमः वामकूर्परे ॐऐं।
नमः दक्षकूर्परे ॐक्लींनमः नाभौ ॐसौंःनमःवामजानुनि ॐ
ऐंनमः दक्षजानुनि ॐक्लींनमः लिंगे ॐसौंःनमः वामपादे ॐऐं
नमः वामपादे ॐक्लींनमः [illegible] ॐसौंःनमः वामपार्श्वे ॐऐं
नमः दक्षपार्श्वे ॐक्लींनमः हृदि ॐसौंःनमः वामस्तने ॐऐंनमः
दक्षस्तने ॐक्लींनमः कंठे ॐसौंःनमः इतिनवयोनिन्यासः अथ
अंतर्नवयोनिन्यासः ततोमूलाधाराद्दिषट्चक्रललाटसीमंत।

226

ब्रह्मरंध्रे श्रीनवरत्नस्थाने श्रीचक्रराजस्वेष्टितनवयोनीः परिक
ल्प्य तासुअग्न्यादिभाग दत्तिणक्रमेण ओड्कबीजत्रयं मनसा।
ध्यायन्न्यसेत्। इति श्रीतनवयोनिन्यासः अथ सृष्टिखंडादिन्यासः
शिखायां ॐ प्रथमकूटं नमः चिबुके ॐ द्वितीयकूटं नमः मुखे ॐ
तृतीयकूटं नमः १ मुखे ॐ प्रथमकूटं नमः कंठे ॐ द्वितीयकूटं नम :
चिबुके ॐ तृतीयकूटं नमः २ चिबुके ॐ प्रथमकूटं नमः हृदये ॐ द्वि
तीयकूटं नमः कंठे ॐ तृतीयकूटं नमः ३ कंठे ॐ प्रथमकूटं नमः ना

227

मृ.
२२७
227

भ्रौ ॐ द्वितीयकूटं नमः हृदये ॐ तृतीयकूटं नमः ४ हृदये ॐ प्र
थमकूटं नमः स्वाधिष्ठाने ॐ द्वितीयकूटं नमः नाभौ ॐ तृतीय।
कूटं नमः ५ नाभौ ॐ प्रथमकूटं नमः मूलाधारे ॐ द्वितीयकूटं न
मः स्वाधिष्ठाने ॐ तृतीयकूटं नमः ६ स्वाधिष्ठाने ॐ प्रथमकूटं।
नमः ऊर्वो ॐ द्वितीयकूटं नमः मूलाधारे ॐ तृतीयकूटं नमः ७
मूलाधारे ॐ प्रथमकूटं नमः जान्वोः ॐ द्वितीयकूटं नमः ऊर्वोः
ॐ तृतीयकूटं नमः ८ ऊर्वोः ॐ प्रथमकूटं नमः पादयोः ॐ द्वितीय

क्रूंटंनमः जान्वोः ॐत्वतीयकूटंनमः इतिषृष्टवत्सादिन्यासः
अथश्रमठन्यासः शिरसि ॐसरस्वत्यैनमः ललाटे ह्रींपा
र्वत्यैनमः दक्षनेत्रे अंसवित्रेनमः वामे मंअग्नयेनमः मुखवृत्ते
ठंचंद्रमसेनमः जिह्वायां श्रींश्रियेनमः दक्षकपोले स्रांदंतिने
नमः वामे ह्रांदंतिनेनमः इतिश्रमठन्यासः इत्थंन्यासान्विधाय
प्रणवसंपुटितां श्रीषोडशार्णांसर्वांगेव्यापकत्वेनविन्यस्य पुनः
प्रणवसंपुटितांश्रीषोडशार्णांस्तथाविधांतांहृदयेन्यसेत् अथ

228

ऋष्यादिकरषडंगन्यासंविधाय शिवोहमितिभावयन् वक्ष्य
माणसंक्षोभिण्यादिनवमुद्राःपाशादिचतुर्मुद्राश्चबद्धा सर्वा
वयवभावेनकामकलारूपंस्वात्मानंध्यात्वा शक्त्युत्थापनमुद्रां
बद्धा प्रातःस्मरणोक्तप्रकारेणमूलाधारात्कुंडलिनीमुत्थाप्य
तथैवषट्चक्रभेदंविधाय तत्तेजसापरिणतांश्रीपरदेवतांहृ
दयकमलगतसिंहासनेश्रीचक्रराजेकामेश्वरांकस्थां सर्वाभर
णसंयुक्तांत्रिखंडामुद्रितकरांध्यायेद्यथा ॐतरुणोल्लाससंयुक्तां

सुप्रसन्नःस्वात्मानमेवतदभेदाकारतयाश्रीफेंनोल्लासवा
न् ॐउद्यच्चन्द्रोदयन्नव्यारक्तपीयूषवारिधेः मध्येहेममयींभूमिं
स्मरेत्माणिक्यमण्डितां तन्मध्येनंदनोद्यानंमदनोन्मादनंमहत्
नित्यप्रमुदितपूर्णेन्दुज्योत्स्नाजालविराजितं कदंबचूतपुन्नाग
नागकेसरचंपकैः बकुलैःपारिजातैश्चसर्वर्तुकुसुमोज्ज्वलैः
झंकारमुखरैर्भृङ्गैःकूजद्भिःकोकिलैःशुकैः नानावर्णैरथान्यैश्चद्वि
जसंघैर्निषेवितं शिविकारंडहंसाद्यैःनानापक्षिभिरावृतं नानापु

229

पु.
२२९

229

ष्पलताकीर्णैः शोभितं वृत्तखंडकैः पर्यंतदीर्घिकोत्फुल्लकम
लोत्पलसंभवैः रजोभिर्धूसरं सम्यक्सेवितं मलयानिलैः ध्यात्वै
वं नंदनोद्यानं तदंतः प्रांगणं स्मरेत् शुद्धकांचनसंकाशावस्त्रयाभि
रलंकृतं प्रांगणं चिंतयित्वेत्यं स्मरसिद्धनिषेवितं तन्मध्ये मंडपं
ध्यायेद्धाम ब्रह्मांडमंडलं सहस्रादित्यसंकाशं चंद्ररश्मिसुशो
भितं रत्नतेजः प्रभापुंजपिंजरीकृतदिङ्मुखं मध्यस्तंभविनिर्मु
क्तं कोणस्तंभसमन्वितं महामाणिक्यवैडूर्यरत्नकांचनभूषितं

मुक्तादामवितानाढ्यं रत्नसोपानभूषितं मंदवायुसमाक्रांतं
गंधपुष्पतरंगितं रत्नचामरछत्रादिविमानैरुपशोभितं जाती
चंपकपुन्नागकेतकीमल्लिकादिभिः सुकोमलसितांभोजमा।
पदीभिः सुपुष्पकैः वहाभिश्चित्रमालाभिः सर्वत्तममलंकृतं
तिर्यगूर्ध्वलसद्रत्नपुत्तलीकोटिमंडितं नानारत्नादिभिर्दिव्यैर्नि
र्मितं विश्वकर्मणा तन्मध्ये विपुलां ध्यायेद्वेदिकां शतयोजनां स
हस्रादित्यसंकाशां कोटिमाणिक्यमंडितां चतुर्द्वारसमेपेतां मा।

स्र.
२३०
230

णिकाद्वारतोरणे प्रदीपैः स्वर्णकुम्भैश्च सर्वतः समलंकृते पता
काभिश्च हेमीभिः सांकुराभिरलंकृते रत्नपीठस्थितैर्दिव्यैरारा
मैः परिशोभिते तदंतरांतराश्लेषघन्मणिदर्पणसंकुले मधुरोदा
रविविधगंधर्वस्त्रीवृंदहिते शृंगाररससंपन्नैर्नवयौवनशोभितैः
अप्सरोनिकरैर्नानामणिभूषणभूषितैः वीणावेणुमृदंगादिवादने
नचन्दनकैः प्रीणयद्भिर्महादेवीपरितोपरितः सदा रत्नसिंहासनं
तस्यावेद्यामध्ये स्मरेत्कुंभे विरिंचिरुद्रविष्णीशशिवपादचतुष्टये

सदाशिवमयं साक्षात्तस्मिन्परशिवात्मकं पुष्पपर्यंकमेवं यत्तत्र
श्रीचक्रनामकं तन्मध्ये योनिमध्यस्थे श्रीमदुड्डानपीठके पर्यंक
वेषविलसत्सल्लिकासनलालितां ध्यायेत्परशिवांकस्थां पद्ममध्या
ज्वलाकृतिं ततो ध्यानं प्रवक्ष्यामि त्रिदशैः सेवनीयकं ततः पद्मनि
भां देवीं बालार्ककिरणारुणां जपाकुसुमसंकाशां दाडिमीकुसुमोप
मां पद्मरागप्रतीकाशां कुंकुमोदकसन्निभां स्फुरन्मुकुटमाणिक्या।
किंकिणीजालमंडितां कालालिकुलसंकाशकुटिलालकपल्लवां

231

ए.
२३१

231

प्रत्यग्रारुणसंकाशवदनांभोजमंडलां किंचिदर्धेंदुकुटिलललाट मृदुपट्टिकां पिनाकधनुराकारभ्रूलतां परमेश्वरीं आनंदमुदितोल्लोललीलान्दोलितलोचनां स्फुरन्मयूखसंघातविलसद्धेमकुंडलां सुगंडमंडलाभोगजितेंदुमृतमंडलां विश्वकर्मादिनिर्माणसूत्रसुस्पष्टनासिकां रक्तविद्रुमबिंबाभरक्तोष्ठीममृतोपमां दाडिमीबीजवद्राजद्दंतपंक्तिविराजितां रत्नद्वीपस्फुरद्रत्नजिह्वामधुरभाषिणीं स्मितमाधुर्यविजितमाधुर्यरससागरात् अनौपम्यगुणोपेतचिबुकोद्देश

शोभितां कंबुग्रीवां महादेवीमरुणाललितैर्भुजैः मणिकंकणके
यूरभारविन्नैः प्रशोभितां सुकोमलदलाकारसुकुमारकरांबुजां
करांबुजनखज्योतिर्विराजितनभस्थली मुक्ताहारलतोपेतसमुन्न
तपयोधरां त्रिवलीवलनायुक्तमध्यदेशसुशोभितां लावण्यसरिदा
वर्ताकारनाभिविभूषितां अनर्घरत्नघटितकांचीयुक्तनितंविनीं
नितंवविंवद्विरदरोमराजीवशांकुरां कदलीललितस्तंभसुकुमारो
रुमीश्वरीं लावण्यकुसुमाकारजानुमंजुलवंधुरां लावण्यकंदलीतु

232

ए.
२३२
232

स्जंघायुगलमंडितां गूढगुल्फपदद्वंद्वप्रपदाजितकच्छपां नख
दीर्घांगुलीभास्वन्नखचंद्रविराजितां ब्रह्मविष्णुशिरोरत्ननिर्घृष्टचर
णांबुजां शीतांशुशतसंकाशकांतिसंतानहासिनीं लौहित्यजित
सिंदूरजपादाडिमरागिणीं रक्तवस्त्रपरीधानां पाशांकुशकरोद्यतां
रक्तपद्मनिविष्टां च रत्नाभरणभूषितां चतुर्भुजां त्रिनेत्रां च पंचबाण
धनुर्धरां कर्पूरशकलोन्मिश्रतांबूलापूरिताननां महामृगमदो।
द्दामकुंकुमारुणविग्रहां सर्वशृंगारवेषाढ्यां सर्वालंकारभूषितां।

जगदाह्लादजननीजगद्रंजनकारिणी जगदाकर्षणकरीजग
त्कारणरूपिणी सर्वमंत्रमयीदेवीसर्वसौभाग्यसुंदरी सर्वलक्ष्मी
मयीनित्यापरमानंदसुंदरी एवंध्यायेन्महेशानीमहात्रिपुरसुं
दरी इतिसैवेकोनध्यात्वा मूलविद्ययात्वशिरसिपुष्पांजलिंदत्वा
पुनर्हृदयकमलेयथोक्तरूपांसांगासावरणांध्यात्वा वक्ष्यमाणप्र
कारेणपीठपूजादिपूर्वकंसांगासावरणांमानसैरुपचारैःसंपूज्य
नैवेद्यंदत्वा भोजनावसानेनैवेद्यदेवंकुर्यात् तत्रमूलाधारेग्नात्मा

233

तदात्मज्ञानात्मपरमात्मस्वरूपंचतुरस्रंकुंडंकुंडल्यग्निसमु।
ज्ज्वले आनंदमेखलायुक्तंविभाव्य तन्मध्येचिदानंदज्ञानाग्नौ।
जुहुयाद्यथा ॐऐंह्रींश्रींमूलंअहंतांजुहोमिस्वाहा मूलंअस
त्यंजुहोमिस्वाहा मूलंपैशुन्यंजुहोमिस्वाहा मूलंकामंजुहोमि
स्वाहा मूलंक्रोधंजुहोमिस्वाहा मूलंलोभंजुहोमिस्वाहा मूलं
मोहंजुहोमिस्वाहा मूलंमदंजुहोमिस्वाहा मूलंमात्सर्यंजुहो।
मिस्वाहा इतिहुत्वापूर्णाहुतित्रयंदद्याद्यथा मूलेनमूलाग्नौनाभि

चैतन्यहविषामनसास्रुचा ज्ञानप्रदीपितेनित्यमन्तर्वृत्तौऽग्ने
ह्रोम्यहंस्वाहा अनेनप्रथमाहुतिंदद्यात् १ मूलं धर्माधर्म।
हविर्दीप्तेआत्माग्नौमनसास्रुचा सुषुम्णावर्त्मनानित्यमन्त
र्वृत्तीर्ग्नेह्रोम्यहंस्वाहा अनेनद्वितीयाहुतिंदद्यात् २ मूलं प्रका
शाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचं धर्माधर्मकलास्नेहपूर्णं
वह्नौजुहोम्यहंस्वाहा अनेनतृतीयाहुतिंदद्यात् ३ अंतर्निरंतरनि।
रिंधनमेधमाने मायांधकारपरिपंथिनिसंविदग्नौ कस्यांचिद

234

पू.
२३४

234

स्फुरन्मरीचिविकासरश्मौ विश्वं जुहोमि वस्नयादिशिवावसा
नेस्वाहा इति पूर्णाहुतित्रयं दत्वा स्वात्मानमेव चिदानंदघनं
ध्यायन् पूर्णोहमद्वितीयोहं शिवोहं साधकोप्यहं परंब्रह्म
त्वं संध्यानकामनायुक्तमानसः श्रोत्फोनोल्लासवांश्चाहं विधू
ताशेषकल्मषः चिदानंदरसापूर्णस्निग्धीभूतचित्तः दे
शिकमुक्तुरकाद्भमीलितो युक्तमानसः प्राणापानत्रोटनेच्छा
पूरिताखिलविश्वहृः एवं साधकसज्ञां विभाव्यार्चनमारभेत्

पुनः हृदयकमले देवीं ध्यात्वा उक्तरूपोपस्थानादि सर्वोपचारैरा
राध्य मूलं यथाशक्ति जपित्वा प्राणायामादिना जपं समर्प्य श्री
गुरुं प्रणम्य स्वदेहं गंधादिभिरलंकृत्य कुंकुमागुरुकस्तूरी।
कर्पूरं चंदनं तथा अनेन गंधदेवेशि मंडलं कारयेत्ततः कल
शस्थापनं कुर्यात् तत्र स्ववामभागे षट्कोणांतर्गतत्रिकोण।
हयबिंदुवास्यवृत्तचतुरस्रं कृत्वा स्वदत्ते त्रिकोणं वृत्तनिविंवमंड
लं भूमौ विरचय्य ऐं कएईलह्रीं नमः अग्रे ह्रीं हसकहलह्रीं न

235

ह्रीं

मः दक्षे सौः सकलह्रीं नमः वामे तदाधारशक्तौ नमः मध्ये इ
ति संपूज्य तत्र श्रीं ह्रीं क्लीं ऐं सौः हृदयाय नमः ओं ऐं ह्रीं श्रीं शिर
से स्वाहा कएईलह्रीं शिखायै वौषट् हसकहलह्रीं कवचाय हुं
सकलह्रीं नेत्रत्रयाय वौषट् सौः ऐं क्लीं ह्रीं श्रीं अस्त्राय फट् इति।
षट्कोणं षडंगेन संपूज्य तदाधारं निक्षिप्य तदुपरि अस्त्राय।
फडिति शोधितं नमः इति मंत्रेण पूरितं पात्रं शंखादिकं वा संस्था
प्य गंधाक्षतपुष्पयवकुशाग्रतिलसर्षपदूर्वा इति सामान्यार्घ्य

पात्रद्वयानि तत्र ॐगंगेचयमुनेचैति इत्यंकुशमुद्रयातीर्थमा
वाह्य गंधाक्षतपुष्पादिकं सामान्यार्घ्यपात्रेप्रणवेणनिक्षिप्य
वह्निसूर्यसोमकलाभिःसंपूज्य धेनुमुद्रांप्रदर्श्य आत्माष्टा
क्षरमंत्रेणत्रयथः ॐह्रींहंसःसोहंस्वाहा स्वमंत्रेणचसंपूजये
त् इतिविधिविहितसामान्यार्घ्योदकेनस्ववामेकृतमंडल
मभ्युक्ष्य तत्राधारशक्त्यैनमः मध्ये तदुपरि कालाग्निरुद्राय
नमः मंडूकायनमः कूर्मायनमः अनंतायनमः मूलप्रकृत्यै

236

ए.
२३८

236

नमः पृथिव्यैनमः सुधांबुधयेनमः सुधासमुद्रायनमः
इक्षुसमुद्रायनमः मदिरासमुद्रायनमः क्षीरसमुद्रायनमः
दधिसमुद्रायनमः घृतसमुद्रायनमः क्षारसमुद्रायनमः
मणिद्वीपायनमः चिंतामणिगृहायनमः नवखंडविराजित
रत्नवेदिकायैनमः चिंतामणिपीठायनमः रत्नसिंहासना।
यनमः सहस्रारपद्मायनमः पद्मरागरत्नायनमः सुवर्णगि
रयेनमः नंदनोद्यानायनमः नानामणिगणेभ्योनमः नाना

देवेभ्योनमः धर्मायनमः ज्ञानायनमः वैराग्यायनमः ऐ
श्वर्यायनमः अधर्मायनमः अज्ञानायनमः अवैराग्यायन
मः अनैश्वर्यायनमः शेषायनमः पद्मायनमः प्रकृतिम 237
यपत्रेभ्योनमः विकारमयकेसरेभ्योनमः पंचाशद्बीजत्र
घितकर्णिकायैनमः सूर्यमंडलायनमः सोममंडलायनमः
वैश्वानरमंडलायनमः संसत्वायनमः रंरजसेनमः तंतम
सेनमः तंतमसेनमः आंआत्मनेनमः अंअंतरात्मनेनमः

पृ.
२३७

237

पंपरमात्मनेनमः ह्रींज्ञानात्मनेनमः वामायैनमः ज्येष्ठायै
नमः रौद्र्यैनमः अंबिकायैनमः इच्छायैनमः ज्ञानायैनमः
क्रियायैनमः कुब्जिकायैनमः चित्रायैनमः विषघ्निकायैन
मः हृतयैनमः आनंदायैनमः मनोन्मन्यैनमः पंपरायैनमः
पंअपरायैनमः पंविद्रूपायैनमः ह्सौंःसदाशिवमहाप्रेतपद्मा
सनायनमः इतिमंडलंसमभ्यर्च्य नमइतिपुष्पांजलिं तत्राधारंसंस्थाप्य।
पप ॐ आं ह्रीं क्रों यं रं लं आदियर्मंप्रदद्दशकलानांआप्राणाइहप्राणाः

जीवइहस्थितः सर्वेंद्रियाणीहस्थितानि वाङ्मनःश्रोत्रप्राणा

इहागत्यसुखंचिरंतिष्ठंतुस्वाहा इतिलेलिहानमुद्रयाप्राणान्संस्था

प्यावाहयेत् यंधूम्रादिधर्मप्रदाग्निकलाइहागच्छत २ संतिष्ठत

सन्निधत्त २ सन्निरुध्यत २ पूजांगृह्णीत २ इत्यावाहनंकृत्वापूजये

त् ॐ रंरींरूंहंरमलवरऊं वह्निमंडलाययर्मप्रददशकलात्मनेपं

कलशाधारायनमः यंधूम्रायैनमः रंनीलवर्णायैनमः लंक।

पिलायैनमः वंविस्फुलिंगिन्यैनमः शंज्वालायैनमः षंहैमवर्णा

238

२

पु.
२३८

238

नमः संकल्पवाहिन्यैनमः हेहविवाहिन्यैनमः लेरोक्ष्यैनमः
ह्रींसंकर्षिण्यैनमः इतिप्रपूज्य फट्इतिकलशंप्रक्षाल्य ह्सौः
स्हौः नमः ॐ भमध्येकारणेनप्रपूरयेत् वेष्टितंरक्तवस्त्रेणर
क्तमाल्याद्यभूषिते तत्रसंस्थापयेद्रक्तादेवीत्वत्साधकः
विलोकयेत्ततोद्रव्यंमूलेनपरिभावयेत् शंभुनाचयथादेवि
विष्णुनाचयथापुरा ब्रह्मणाचयथास्थैर्वंतथात्वांस्थापयाम्यहं
ॐ ह्रीं श्रीं महात्रिपुरादेव्याकलशंसंस्थापयामिनमः इतिप।

ठित्वा ॐ ह्रां ह्रीं ह्रूं हमलवरयऊं अर्कमंडलायवसुप्रदद्वादश
कलात्मनेनमः ॐ ऐं ह्रीं श्रीं ग्रां ह्रीं क्रौं अं अर्कद्वादशावसुप्रद
कलानांप्राणाइहप्राणाः जीवइहस्थितः सर्वेंद्रियाणीहस्थि
तानि वाङ्मनःश्रोत्रघ्राणाइहागत्यसुखंचिरंतिष्ठंतुस्वाहा इति
लेलिहानमुद्रयाप्राणान्संस्थाप्यावाहयेत् ॐ वसुप्रदतपिन्या
द्याद्वादशकलाइहागच्छत २ संतिष्ठत २ सन्निदधत १ संमुखी
भवत १ इत्यावाह्यसंपूजयेत् क्लीं विशेषार्घ्यपात्रायनमः इतिप्रपू



ए.
२३९
239

अथ द्वादशकलाः पूजयेद्यथा कंभंतपिन्यैनमः खंबंतापिन्यै
नमः गंफंबोधिन्यैनमः घंपंरोधिन्यैनमः ङंनंकालिन्यैनमः
चंधंशोषिन्यैनमः छंदंवरेण्यैनमः जंथंआकर्षिण्यैनमः
झंतंमायायैनमः ञंणंविद्यावत्यैनमः टंढंहेमप्रभायैनमः
ठंडंक्षमायैनमः इतिकलशेसम्पूज्य क्षंळंहंसंषंशंवंलंरंयंमं
भंबंफंपंनंधंदंथंतंणंढंडंठंटंञंझंजंछंचंङंघंगंखंकंअःअंऔंओं
ऐंएंॡंऌंॠंऋंऊंउंईंइंआंअं इतिपठन्मानकेनतंकलशंप्रपूर्य

तदमृतंचंद्ररूपंविभाव्य ॐसांसींसूंसमलवरयूंचंद्रमंडला
यकामप्रदषोडशकलात्मनेनमः इतिप्रपूज्य ॐआंह्रींक्रों।
कामप्रदामृतादिचंद्रषोडशकलानांप्राणाइहप्राणाः जीवइह
स्थितः सर्वेंद्रियाणीहस्थितानि वाङ्मनःश्रोत्रत्वक्चक्षुर्घ्राणप्राणा
इहागत्यसुखंतिष्ठंतुस्वाहा इतिलेलिहानमुद्रयाप्राणान्दत्वा
आवाहयेत् ॐअमृतादिकामप्रदषोडशकलाः इहागच्छत २ सं
तिष्ठत २ सन्निदधत २ संमुखीभवत २ इत्यावाहनंकृत्वाऽर्चयेत्

२५०

स. सोडशकलाः पूजयेद्यथा अं अमृतायैनमः आं मानदायैनमः
१४. इं तुष्ट्यैनमः ईं पुष्ट्यैनमः उं प्रीतयेनमः ऊं रतयेनमः ऋं श्रिये
246 नमः ॠं ह्रियेनमः ऌं स्वधायैनमः ॡं रात्र्यैनमः एं ज्योत्स्नायै।
नमः ऐं हैमवत्यैनमः ओं छायायैनमः औं पूर्णिमायैनमः अं नि
त्यायैनमः अः अमावस्यायैनमः एताः कला द्रव्ये संपूज्य फट् इ
ति संरक्ष्य हूं इत्यवगुंठ्य मूलेन संवीक्ष्य नमः इत्यभ्युक्ष्य मूलेन।
गंधमाघ्राय एलालवंगकस्तूरीचंदनोशीरपुष्पिकं घटेनिक्षि

प्यदेवेशिशापंचमोचयेद्यथा रक्तवस्त्रमाल्यादिनातंकल
शंसंभूष्य मूलेनह्स्रवैंफ्रें पथिकदेवनाम्योंह्रंफट्स्वाहा ह
स्रवैंफ्रें स्रास्फालिनीग्रामचेंडालिनीऊंफट्स्वाहा ह्स्रवैंफ्रें क्रो
धचांडालिनीह्रंफट्स्वाहा ह्स्रवैंफ्रें दृष्टिचांडालिनीऊंफट्स्वा
हा ह्स्रवैंफ्रें स्टष्टिचांडालिनीऊं॰ ह्स्रवैंफ्रें चटचांडालिनीऊं॰
ह्स्रवैंफ्रें तपनवेधचांडालिनीऊं॰ ह्स्रवैंफ्रें निर्दैवचांडालिनी
ऊं॰ ह्स्रवैंफ्रें तनदृष्टिस्पर्शदोषचांडालिनीऊं॰ ह्स्रवैंफ्रें प।

2५।

पु॰
२४१

श्रुपाशचांडालिनीॐफट्स्वाहा इतिकलशमंत्रंतंगंधाक्षत
पुष्पैःसंपूज्य तत्रकलशेमूलंपठन् अंअांइत्यादिसं त्रिको
णमध्ये बिंदुविंवेहंलंक्षंः तत्रपरंगंध्यात्वा इष्टदेवतांसंपूज
येत् ततः ॐह्रींपरस्वामिनिपरमाकाशशून्यवाहिनिचंद्रा
र्काग्निभक्षिणिपात्रेविशविशस्वाहा इतिचंटष्टवादशयाप
ठेत् अंअांइत्यादिततः देवताभ्यःपितृभ्यश्चमहायोगीभ्यएव
च नमःस्वधायैचस्वाहायैचनित्यमेवभवन्तिह इतित्रिःपठेत् आ

(241)

कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् इति ऋचमपि दश धा जपेत् मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः मधु नक्तमुतोषसः मधुमत्पार्थिवं रजः मधु द्यौर स्तु नः पिता मधुमान्नो वनस्पतिर्मधुमानस्तु सूर्यः माध्वीर्गा वो भवन्तु नः ॐ मधु ३ इति दशधा जपेत् ॐ पं ह्रीं श्रीं ग्रां नं देव्य ा य विद्महे श्रीमहादेव्यै धीमहि तन्नोऽर्धनारीश्वरः प्रचोदयात्

242

पृ.
२४२

242

इतिगायत्रींदशधाजप्त्वा १० हंसः शुचिषद्वसुरंतरिक्षसद्धो
तावेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा
गोजाऋतजाअद्रिजाऋतम् इतित्रिःजपेत् ३ अग्निमीडेपु
रोहितंयज्ञस्यदेवमृत्विजंहोतारंरत्नधातमम् इत्यपित्रिःसं
जपेत् ३ वांवींवूंवैंवौंवः ब्रह्मशापमोचितायैस्वरादेव्यैनमः
इतिदशधाजप्त्वा १० सांसींसूंसैंसौंसः शुक्रशापमोचय २
स्वरादेव्यैनमः इतिघटेत्रिःसंस्तुत्य इषेत्वोर्जेत्वावायवस्थापा

यवस्य: देवोव: सविताप्रार्थयतस्ष्टितमायकुर्वन्त इतिस्त
वमेकवारंपठेत् । ॐह्रींश्रींक्रांक्रींक्रूंक्रैंक्रौंक्रः स्वरेक्रूस्पशा
पंमोचय २ अमृतंस्रावय २ स्वाहा इतित्रि:जपेत् २ अग्नआ।
याहिवीतयेगृह्णानोहव्यदातये निहोतासत्छिवर्हिषे ३
तिदशधाजपेत् ४ शुक्रपापहरीविद्यांपठेद्यथा ॐसूर्यंमे
डलंसंभूतेवरुणालयसंभवे अमावीजमयेदेविशुक्रशापा।
द्विमुच्यतो वेदानांप्रणवोवीजंब्रह्मानंदमयोयदि तेनसत्येन

243

पू. २४३

243

देवेशब्रह्महत्याव्यपोहतु ॐ ऊंनमः एकमेवपरंब्रह्मस्थूल
सूक्ष्ममयंपरं कचोद्भवोब्रह्महत्यांतेनतेनाशयाम्यहं ब्र
ह्मशापविनिर्मुक्तात्वंमुक्ताविष्णुशापतः विमुक्तारुद्रशापे
नपविशाभवसांप्रतं इतित्रिःपठित्वा १ शंनोदेवीरभिष्टयआ
पोभवंतुपीतये शंयोरभिस्रवंतुनः इतिदशधाजपेत् १० ह्रीं
श्रीं क्लां क्लीं क्लूं क्लैं क्लौं क्लः कुरिकाकारिणिशोभिणिविकारान
स्पृहमसहन २ स्वाहा इतिकलशोपरिदशधापठित्वा १०

ॐ योविश्वचक्षुरुतविश्वतोमुखोविश्वतोहस्तउतविश्वः।
तस्मात् संबाहुभ्यांनमतेसंयजत्रांद्यावापृथिवीजनयन्दे
वएकः इतिदशधाजपेत् १ ततःसहस्रारेगुरुंध्यात्वा स्व
कमलेइष्टदेवतांप्रणम्य श्रीगुरुंदेशिकानंदसरिताशेषमं
डलं आनंदसंदोहितसर्वेब्रह्मविष्ण्वादिसुरैरितं ज्ञानमुद्राभय
वरपुस्तकोद्यतंभुजैः समस्तदेवतारूपकारणात्मानमव्य
यं एवंद्ध्यैदेशिकेंद्रंप्रजयेन्मातृकाक्रमैः ततोदेवींहृद्गमध्ये

244

२.
२४४
244

चिंतयेत्परदेवतां लोहितांकारुणानंदरूपामोन्मनसीस्थितिं
श्रीसह्वात्मैकवपुर्दिव्यकामेशानशिवस्थितां महामुदितचि।
द्रूपांपाशांकुशधनुःशरान् दधतींब्रह्ममध्येतु ध्यानंकुर्याद्धिव
लक्षणः श्रीतिरस्करिणींध्यात्वाजपेत् ॐनीलतोयदसंकाशां
नीलकुंतलशोभितां नीलांबरधरांदेवींनीलोत्पलविलोचनां
नीलपुष्पविभूषाढ्यांनीलालंकारभूषितां नीलांगरागसंछन्नां
नीलवैडूर्यमालिनीं इंद्रनीलनिबद्धांगमहार्घमणिभूषणा

नीलवाजिसमारूढां नीलवस्त्राद्युधां परां निद्रापटेन नीलेन
भुवनानि चतुर्दश मोहयंतीं महामायां ईश्वनिंदकभक्षिणीं
वीरपानरतान्वीरान्पालयंतीं समंततः संकेतमंडलेदिक्षु छा
दयंतीं स्ववाससा परमानंदवपुषं परमानंदभैरवी परमानं
दजननीं प्रणमामि परां शिवां इति तिरस्करिणीं ध्यात्वा मंत्रं
जपेत् ऐं क्लीं श्रौं ह्रीं श्रीं तिरस्करिणि सकलपशुजनवाक्स्त
म्भिनि सकलपशुजनजातमनश्चक्षुः श्रोत्रजिह्वाघ्राणादीनि

245

पु.
२४५

245

तिरस्कुरु २ ठः ३ स्वाहा इतिचैटेदशधाजप्त्वा परंब्रह्मपंरधा
मशुद्धिर्ज्योतिर्निरामयं पितरस्तस्योपतिष्ठंतिपावमानंस्म।
नातनं यःसामिधेनीरध्येतिऋषिभिःसंभृतोरसः तस्मैसरस्व
तीदुहेक्षीरंसर्पिर्मधूदकं पावमानःपरंब्रह्मपावमानःपरो
रसः पावमानंपरंज्ञानंतेनत्वांपावयाम्यहं इतित्रिःजप्त्वा श्री
गुरुंध्यात्वा वंइतिजपन् हंसःइत्यर्कमंत्रंजपन् ॐइतिमुद्राः प्र
योगेनाऽमृतंवामनासाग्रात्कलशेनिक्षिपेत् ततोऽमृतमुद्रया

ऽमृतीकृत्य ह्रीं श्रीं क्लीं अमृते अमृते अमृतोद्भवे अमृतवर्षिण्यऽमृ
तं स्रावय २ ऐं क्रौं अमृतेश्वर्यै नमः इति त्रिः पठित्वा २ अमृत
यंत्रं ध्यात्वा कर्पूरैलालवंगकस्तूरीचंदनोशीरमिश्रितं वि
धाय मूलं गंगे चेति इति तीर्थाम्बु ऊर्ध्वाधोद्रव्यावास सर्वतो
र्थमयं दिव्यं ध्यायेत् ततोऽर्घ्यमध्ये विंदुयुत पूर्वं वह्निकोणं वि
न्यस्य योनिमुद्रां निबध्य विंदावानंदभैरवं सुरां देवीं च ध्यायेद्य
था ॐ सूर्यकोटिप्रतीकाशं चंद्रकोटिसुशीतलं अष्टादशभुजं

246

वं पंचवक्त्रं त्रिलोचनं अमृतार्णवमध्यस्थं ब्रह्मपद्मोपरिस्थितं
वृषारूढं नीलकंठं सर्वाभरणभूषितं कपालखट्वांगधरं घंटा
डमरुवादिनं पाशांकुशधरं देवं गदामुसलधारिणं खड्गखेटक
पट्टिशमुद्गरशूलकुंतिनं विचित्रखेटकं मुंडं वरदाभयपाणि
कं लोहितं देवदेवेशं भावयेत्साधकोत्तमः दत्वा पुष्पांजलिं
ॐ भैं जपेदानंदभैरवं इति ध्यात्वा ॐ भैं पुष्पांजलिं दत्वाऽनंद
भैरवमंत्रं दशधा जपेत् ह्सरक्तमलवयऊं आनंदभैरवाय वौ

फट् इतिदशधाजप्त्वा १ आनंदभैरवं कोपविष्टां महादेवीं
ध्यायेद्यथा ॐ समुद्रमथ्यमाने तु क्षीराब्धौ सागरोत्तमे त
त्रोत्पन्नां महादेवीं कुमारीरूपधारिणीं भावयेत् महादेवीं चंद्र
कोट्ययुतप्रभां हिमकुंदेंदुधवलां पंचवक्त्रां त्रिलोचनां अष्टा
दशभुजैर्युक्तां सर्वानंदकरोद्यतां प्रहसंतीं विशालाक्षीं देव
देवस्य संमुखीं दत्वा पुष्पांजलिं कुंभे जपेदानंदभैरवीं इतिध्या
त्वा सहस्रमलवरयऊं महादेव्यै वौषट् इतिदशधाजप्त्वा १

247

ए.
२४०

महामुद्रायोनिधेनुमत्स्यमुद्राः प्रदर्शयेत् ततो लेलिहाना।
ख्यां मुद्रां बद्ध्वा कुंडलिनीं पुनर्मूलाधारात्समुत्थाप्य सुषुम्णा
वर्त्मना द्वादशांतं समाख्याप्य सोऽहं हंसः इति स्मरन् शिवेन
सह संयोज्य परमानंदमयो भूत्वा तदुद्भवामृतवृष्टिं वामना
सापुटेन प्रणवं स्मरन् परद्वक्त्रे नियोज्य सान्द्रादमृतं तत्राप्यं।
कलशं ध्यायेत् ततः वमिति वरुणबीजमुच्चार्य मूलमंत्रमु
मुच्चरन् दशधा जप्त्वा ९ यंत्रानिःस्वनपूर्वकं नानाविधपुष्पा।

247

माल्यभूषणधूपदीपविधौषधयप्रणामस्तुतिभिः कलशंसंपू
ज्य सर्वदेवमयं ध्यायेत् इति घटे शक्तिचक्रं विलिख्य तन्मध्ये
हूंलंहंचविलिख्य वं मूलं अष्टधा घटं स्पृष्ट्वा पठेत् घटस्थापनवि
धायेमध्ये विशेषार्घं स्थापयेद्यथा स्वार्थं च द्वादशांगसक्तो देवार्थं द्वा
दशं त्यजेत् द्वादशांगुलमध्यस्थं विशेषार्घं स्थापयेच्छिवे इति
घटपूजा अथ श्रीपात्रपूजा तत्रात्मश्रीचक्रयोर्मध्ये त्रिकोणं
षट्कोणवृत्तचतुरस्रं विलिख्य चतुरस्रे पूर्णगिरिपीठाय नमः

248

पु.
२४८

248

उड्डियानपीठायनमः कामरूपपीठायनमः जालंधरपीठायन
मः इतिसंपूज्य षट्कोणेषडंगंचसंपूज्य त्रिकूरेनत्रिकोणाग्रद
क्षोत्तरेसंपूज्य मध्येआधारशक्तीःसंपूज्य त्रिकोणगर्भेयंत्रिकों
षट्कोणभूषितांसंस्थाप्य नमइतिसामान्यार्घ्यजलेनाभ्युक्ष्य ॐ
रांरींरूंरैंरौंरः रमलवरयऊं अग्निमंडलायधर्मप्रदद्दशकमलात्म
ने पेंविशेषार्घ्यासनायनमः इतिविशेषार्घ्यासनंसंपूज्य यंधूम्रा
र्चिषेनमः रंऊष्मायैनमः लंज्वलिन्यैनमः वंज्वालिन्यैनमः शंवि

स्फुलिंगिन्यैनमः षंसुश्रियेनमः सं स्वरूपायैनमः हं कपिला

यैनमः लं हव्यवाहायैनमः क्षं कव्यवाहायैनमः इतिसंपूज्य

मध्ये रं वह्निमंडलायदशकलात्मनेनमः इतिसंपूज्य षट्कोणे

षंडंचसंपूज्य त्रिकोणेत्रिकूटं मध्येमूलेनदेवींसंपूज्य ह्रैंऊं खलां

ऊं चषकायस्वाहा इतिपात्रंवामकरेणधृत्वा फट् इतिप्रक्षाल्य

ॐ श्रीमहात्रिपुरसुंदर्याविशेषार्घ्यपात्रंस्थापयामिनमः इतिपा

त्रंयंत्रिकोपरिसंस्थाप्य तत्र कंभंतपिन्यैनमः खंबंतापिन्यैनमः

249

गंफंधूम्रायैनमः घंपंमरीच्यैनमः ङंनंज्वालिन्यैनमः चंधंरु
च्यैनमः छंदंसुषुम्णायैनमः जंथंभोगदायैनमः झंतंविश्वा
यैनमः ञंणंबोधिन्यैनमः टंढंधारिण्यैनमः ठंडंक्षमायैनमः
इतिसंपूज्य अंअर्कमंडलायद्वादशकलात्मनेनमः इतिसंपूज्य
त्रिकोणवृत्तषट्कोणंपात्रेविलिख्य समस्तव्यस्तमंत्रेणसंपूज्य
षट्कोणेषडंगं त्रिकोणेत्रिकूटंसंपूज्य वमितिवरुणबीजंमूलं
तंलंहंसंषंशंवंलंरंयंमंभंबंफंपंनंधंदंथंतंणंढंडंठंटंञंझंजंछं

चंङं·घंगंखंकंअः अंऔंओंऐंएंॡंऌंॠंऋंऊंउंईंइंआंअंइतिविलो
ममातृकांचपठन् तत्त्वमुद्रयाअमृतेनत्रिकोणंप्रपूर्य जलेनव
भागमेकंप्रपूर्य तत्रस्वगंधादिनित्तिप्य सांसींसूंसैंसौंसःसम।
लवरयऊंसंसोममंडलायकामप्रदषोडशकलात्मनेनमः
सौंः विशेषार्घ्यामृतायनमः इतिविशेषार्घ्यामृतंसंपूज्य अंअ
मृतायैनमः आंमानदायैनमः इंपूषायैनमः ईंतुष्ट्यैनमः उंपुष्ट्यै
नमः ऊंरत्यैनमः ऋंधृत्यैनमः ॠंशशिन्यैनमः ॡंचंद्रिकायैनम :

250

स्र. १५० 250

ल्रंकांत्यैनमः पंज्योत्स्नायैनमः पैंश्रियैनमः ॐंप्रीत्यैनमः ॐं
अंगदायैनमः अंपूर्णायैनमः अंःपूर्णामृतायैनमः इतिसं
पूज्य धंकामप्रदषोडशकलात्मने सोममंडलायनमः इति
संपूज्य पूर्ववद्यंत्रंदक्षे विलिख्य त्रिकोणशिरोवायां अं १६ कं १६
थं १६ इतित्रिर्विलिख्य कूटत्रितयेनत्रिकोणंसंपूज्य षट्को।
णमध्येगंच गंगेचयमुनेत्यादि इतिक्रों ग्रंऊंशमृदयातीर्थमा।
वाह्य आनंदभैरवभैरव्योस्तुमंत्रेणसंपूज्य वामावर्त्तेनदेव्या

एकं पात्रे पूजयेत् ॐ ह्रीं इंद्राविष्णवे वौषट् ॐ ह्रीं यं वेदिश्यै वौष
ट् ॐ ह्रीं विश्वानं दिश्यै वौषट् ॐ ह्रीं लं वोयिश्यै वौषट् ॐ ह्रीं मउ
न्मादिश्यै वौषट् ॐ ह्रीं हं समोहिश्यै वौषट् ॐ ह्रीं रं धामिश्यै वौष
ट् ॐ ह्रीं ह्रं मूर्छिश्यै वौषट् इति संपूज्य रत्नेषं रीपूर्वादितः पूज
येद्यथा ग्लूं ब्रह्मणे गगनलोक गोमेदरत्नाय नमः पूर्वे ग्लूं वि
ष्णवे स्वर्गलोक स्वर्णरत्नाय नमः दक्षे ग्लूं रुद्राय पाताललोक
पद्मरागरत्नाय नमः पश्चिमे ग्लूं रुद्रेश्वराय मर्त्यलोक माणि

कारत्नायनमः ॐ नमो ह्रूं सदाशिवनागलोकनीलरत्नायनमः
मध्ये यटविशेषार्घ्यपर्यंतपात्राणिद्रव्येणपूरयेत् यटसमीपे
गुरुपात्रं आत्मपात्रं स्वपात्रं शक्तिपात्रं योगिनीपात्रं वीरपात्रं व
लिपात्रं श्रीपात्रसदृक्ते पाद्यपात्राणिजलेनसर्वान्पूरयेत् उशी
रंरोचनंचैवपाद्यपात्रेषुनिक्षिपेत् १ ऊशाग्रानक्षतंचैवयववीहि
तिलानपि आज्यसिद्धार्थपुष्पाणिक्षिपेदर्घ्येसपात्रके २ माक्षिकं
शर्करासर्पिदधिक्षीरयुतंतथा मधुपर्केक्षिपेद्देवियथाचविधिस्

र्वकं ३ जातिकर्णकंकोलजायज्ञोचयथाशिवे हृर्णीयित्वाया
प्यादेविन्तिपेदाचमनीयकं स्नानीयपात्रे ५ पुनराचमनीयपा
त्रे ८ पात्राणिस्थापयेदित्थंपीठरत्नंयथाशिवे चतुर्विंशत्यंगु
लंसमुरतःस्ववर्णादिपीठंसंस्थाप्य मांसादीन्संजयेद्यथा त
त्रचतुरस्रबिंबंविलिख्य तत्रमांसादिपात्राणिसंस्थाप्य अस्त्रा
यफट् इतिसामान्यार्घोदकेनाभ्युक्ष्य हूमितिप्रवगुंठ्य यमिति
संशोष्य रमितिसंदह्य वमित्याप्लाव्य येनमुद्रयाम्रतीकृत्य

252

प्र.
१५२

252

योनिमुद्रांप्रदर्श्य मत्स्यमुद्रयाच्छाद्य आनंदेश्वरभैरवमंत्रमूलं
चदशधाजप्त्वा ९ छागलाजेनमांसेनकृतरूपायविश्वे वल्प
र्थेशिवशाक्तोत्सवप्रपद्येविश्वमक्षयं प्रतर्पयामिवल्यर्थेपवि
त्रीभवसांप्रतं इतित्रिःपठित्वा ह्रींह्रदयेनमः इत्यपित्रिःपठित्वा
इदंचपठेत् प्रतद्विष्णुस्तवतेवीर्येण मृगोनभीमःकुचरोगिरिष्ठः
यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियंतिभुवनानिविश्वा इतिमां
सशोधनं अथमीनशोधनं ॐकृतावतारोद्धारिणाकलिनापीडि

नेजगत् वलिनानिगृहीतंचकौलिकानांयथेच्छया भैरवीप
रितोषार्थं स्वयंमीनोभवद्धरिः ह्रींहरयेनमः इतित्रिःपठित्वा
त्र्यंवकंयजामहेसुगंधिंपुष्टिवर्धनं उर्वारुकमिववंधनान्मृ।
त्योर्मुक्षीयमामृतात् इतिमीनशोधनं अथमुद्राशोधनं ॐदे
वताप्रजनीयानिभैरभेयाणिमांप्रतं वल्पार्थदेवदेवाम्भपवि
त्राणीह्रसिद्धये मूलंदशधाजप्त्वा तद्विष्णोःपरमंपदंसदापश्यं
तिसूरयः दिवीवचक्षुराततंतद्विप्रासोविपण्यवोजागृवांसः।

253

प्र.
२५३

सम्मिंधते विष्णोर्यत्परमंपदं इतिमुद्राप्रणोपनं अथकुंडगोला

दिप्रोयनं कुंडगोलोपरि।धेनुयोनिमत्स्यमुद्रात्रयंप्रदर्श्य मूल

दशधाजप्त्वा विष्णुर्योनिं कल्पयतुत्वष्टारूपाणिपिंशतु आसिं

चतुप्रजापतिर्धातागर्भंददातुते गर्भंदेहिसिनीवालीगर्भंदे

हिसरस्वती गर्भंदेह्यश्विनौदेवावाधत्तांपुष्करस्रजं इतिकुंडगो

लादिप्रोयनं अथमांसादीनांशापहरीविद्या ॐ ह्रूं स्त्रूं स्रूं फ्रूं स्त्रूं

पिंजंसः अमृतेअमृतोद्भवेअमृतेश्वरिअमृतंस्रावय २ स्वाहा

283

इतिमांसादीनां उपरिशापहंरीत्रिःपठेत् इतिमांसादिसंशोध्य
स्रोपात्रोपरिहमित्यवगुंठ्याऽमृतीकृत्य तालत्रयेणदिग्गाःसंबं
ध्य तदुपरिसमयामूलंसंजप्य तत्रदेवीमावाह्य तालत्रयेण
दिग्वंधंविधायाऽवगुंठ्ययोनिंप्रदर्श्य कुंडलिन्याःप्रयोगेनरा
जदंतवर्त्मनानिःसृतामऽमृतधारांयोनिमुद्राेल्लासितेनकरे।
णानीय मूलविद्यांते ब्रह्मांडखंडसंभूतमशेषरससंभृतं स्नापू
रितमहापात्रंपीयूषरसमावह। अखंडैकरसानंदकारेपरसुधा

254

ए. २५४

त्मनि स्वच्छंदस्फुरणामत्र निधेहि कुलरूपिणि २ अकुलस्थामृ
ताकारे सिद्धिज्ञानकरे परे अमृतत्वं निधेह्यस्मिन्वस्तुनि क्लि
न्नरूपिणि २ ऐं अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि।
अमृतं स्रावय २ ॐ जूं सः स्वाहा इत्यभिमंत्र्य सौः तद्रूपेणैकर।
स्यं च कृत्वा ह्येतत्स्वरूपिणि भूत्वा परामृताकारं मयि चित्स्फुरणं कु
रु इत्यभिमंत्र्य ह्सौः नमः इति संपूज्य शंखमुद्रां प्रदर्श्य षडंगेन।
सकलीकृत्य मत्स्यमुद्रयाऽऽयात्रमाच्छाद्य मूलं दशधा जप्त्वा पात्रं

देवीरूपं भावयेत् इति विशेषार्घ्यस्थापनविधिः ततस्तस्मर

तस्तेनैव विधिना श्रीपात्रं स्थापयेत् तेनैव मूलदेवीव्यतिरि

क्तावरणदेवतास्तर्पयेत् पूजासमर्पणादिकं मूलदेवीतर्प

णं च विशेषार्घ्येणैव तत्र अनंगकुसुमादिपर्यंतमावरणपूजा

समर्पणमर्घ्यदानं सामान्यार्घ्यजलेनैव कुर्यात् इति श्रीपात्रस्था

पनविधिः तदनुक्रमेणैव देव्यास्तामादाय ञ्चटसमीपे गुरुपात्रं काच्यं

शक्तिपात्रं भोगपात्रं स्वपात्रं योगिनीपात्रं वीरपात्रं बलिपात्रं पा।

सौवर्णे राजते नारिकेले स्फाटिके याटक्रिके रीतिमये

255

ए.
१५५

255

ताम्र रौप्य सौवर्ण कांस्य

यपात्रं अर्घ्यपात्रं आचमनीयपात्रं मधुपर्कपात्रं इत्येतानि पात्रा
णि संस्थाप्य माषप्रमाणचर्वणयुक्तकारणेन वामहस्तकृत त
त्त्वमुद्रया श्रीपात्रात्समुद्धृत्य दक्षहस्तकृततत्त्वानमुद्रयामृतं
गृहीत्वा मूलं ह्सरत्नमलवयऊं आनंदभैरवं पूजयामि नमः तर्प
यामि नमः मूलं सहरत्नमलवयऊं सुरादेवीं पूजयामि नमः तर्पया
मि नमः इति त्रिः स्वललाटमध्ये भ्रूमध्ये संतर्पयेत् ततः गुरुं गुरुपा
त्रामृतेन स्वशिरसि गुरुमंत्रं पठित्वा श्रीमच्छ्री अमुकानंदनाथश्री

पाडुकांतर्पयामिनमः इतित्रिःसंतर्प्य एवंश्रीमच्छ्रीपरमगुरुं
तर्पयामिनमः श्रीमच्छ्रीपरमेष्ठिगुरुंतर्पयामिनमः श्रीमच्छ्री
परमाचार्यगुरुश्रीपाडुकांतर्पयामिनमः इतिसंतर्प्य ततः
विशेषार्घ्यपात्रामृतेनॐऐंह्रींश्रींश्रीमच्छ्रीमहात्रिपुरसुंदरीं
साङ्गांसवाहनांसपरिकरांसमुद्रांतर्पयामिनमः इति[illegible]
दिंसंतर्प्य प्रोक्षणीपात्रंसंस्थाप्य विशेषार्घ्यबिंदुनासंस्कृत्यात्मा
नंसंप्रोक्षयेत् तेनैवजलेनस्वात्मानंप्रोक्ष्ययथा ऐंप्रथमकूटं

पु.
२५८

256

आत्मतत्वात्मनेनमः क्लींद्वितीयकूटंविद्यातत्वात्मनेनमः सौंः
तृतीयकूटंशिवतत्वात्मनेनमः ऐंक्लींसौंः मूलंसर्वतत्वात्मने
नमः इतिस्वात्मानंप्रोक्ष्य मूलेनयागभूमिमुपकरणानिचप्रोक्ष्य
तस्मात्सर्वंब्रह्ममयंभवेत् सर्ववस्तुमुपेत्यमुद्रांप्रदर्शयेत् इतिक
लशस्थापनविधिः अथात्मपूजा पुरतस्त्रिकोणमंडलस्यद्वारेपात्रं
संस्थाप्य कलशोदकेनापूर्य्याविशेषार्घ्यबिंदुंदत्वा स्वदेहंगंधादि
नाऽलंकृत्य आत्मानंदेवीरूपंभावयन् ॐऐंह्रींश्रीं गुरुपादुकाभ्यो।

पीठं ध्यात्वा अनंतपद्मादिपरतत्त्वांतं संपूज्य तत्केसरेषु प्रा
गादिप्रागदक्षिणेन ॐ पें ह्रीं श्रीं मोहिनी श्रीपादुकां पूजयामि
नमः ॐ क्षोभिनी श्रीपादुकां पूजयामि नमः ॐ वज्रिनी श्रीपा
दुकां पूजयामि नमः ॐ स्तंभिनी श्रीपादुकां पूजयामि नमः ॐ
आकर्षिणी श्रीपादुकां पूजयामि नमः ॐ द्राविणी श्रीपादुकां पू
जयामि नमः ॐ ह्लादिनी श्रीपादुकां पूजयामि नमः ॐ क्लिन्ना
श्रीपादुकां पूजयामि नमः इति संपूज्य मध्ये ॐ क्लेदिनी श्रीपादु

सु.
२५७

गुरुपादुकास्तत्त्वार्थे श्रीश्रमुकानंदनाथश्रीपादुकां पूजयामि।
नमः इतिसंपूज्य मूलाधारे गंपेंह्रींश्रींगंगणपतिश्रीपादुकां
पूजयामिनमः इतिसंपूज्य योगपीठन्यासक्रमेण मंडूकाद्या।
न्मूलाधारादितत्त्वस्थानेषुसिंहासनांतान्संपूज्य दक्षवामांस
दक्षवामोरुसर्वांगेषुपंचप्रेतासनंसंपूज्य दक्षांसादिषुधर्मा।
दिचतुष्टयंसंपूज्य हृदयेमायाविद्येसंपूज्य मध्ये पंचदशफ।
णान्वितमनंतंध्यात्वा तन्मध्यकोणेअष्टदलकमलेकामेश्वरी

2587

दक्षशंखे ॐकलाशक्तिश्रीपादुकांपूजयामिनमः ॐज्येष्ठाशक्ति
श्रीपादुकांपूजयामिनमः दक्षनेत्रे ॐरौद्रीशक्तिश्रीपादुकांपू
जयामिनमः दक्षकर्णे ॐवामाशक्तिश्रीपादुकांपूजयामिनमः
ॐविषघ्नीशक्तिश्रीपादुकांपूजयामिनमः चिबुके ॐहृतरीशक्ति
श्रीपादुकांपूजयामिनमः हृदये ॐसर्वानंदशक्तिश्रीपादुकांपू
जयामिनमः इतिसंपूज्य अंकंखंगंघंङंचंछंजंझंञंटंठंडंढंणंतंथं
दंधंनंपंफंबंभंमंयंरंलंवंशंषंसंहंलंक्षंः प्राणशक्तिसदाशिवेश्वर

259

ए. कायैनमः इतिसंपूज्य ह्रींसर्वशक्तिकमलासनायनमः इति
२५८ पुष्पांजलिनास्वदेहंसंपूज्य तन्मध्यकर्णिकायांश्रीचक्रंविभा

258

व्य ॐसमस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भरह
स्यपरापररहस्यपरापरातिरहस्ययोगिनीचक्रपादुकाभ्यो
नमः स्वदेहंसंपूज्य प्रागुक्तयोगिनीपीठन्यासक्रमेणषडासन
पर्यंतप्राग्विन्यस्तस्थानेषुसंपूज्य दक्षांसे ॐनादशक्तिपादुकां
पूजयामिनमः दक्षपृष्ठे ॐविंदुशक्तिश्रीपादुकांपूजयामिनमः

दक्षललाटे

दक्षशंखे ॐकलाशक्तिश्रीपादुकांपूजयामिनमः ॐज्येष्ठाशक्ति
श्रीपादुकांपूजयामिनमः दक्षनेत्रे ॐरौद्रीशक्तिश्रीपादुकांपू
जयामिनमः दक्षकर्णे ॐवामाशक्तिश्रीपादुकांपूजयामिनमः
ॐविघ्नीशक्तिश्रीपादुकांपूजयामिनमः चिबुके ॐहृतरीशक्ति
श्रीपादुकांपूजयामिनमः हृदये ॐसर्वानंदशक्तिश्रीपादुकांपू
जयामिनमः इतिसंपूज्य अंकंखंगंघंङं चंछंजंझंञंटंठंडंढंणंतंथं
दंधंनंपंफंबंभंमंयंरंलंवंशंषंसंहंलंक्षंः प्राषशक्तिसदाशिवेश्वर

259

पु.
१५९
259

शुद्धविद्यामायाकलाविद्यारागकालनियतिपुरुषप्रकृत्यहंकारबुद्धिमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थ। शब्दस्पर्शरसरूपगंधाकाशवाय्वग्निसलिलपृथिव्यात्मने षट्त्रिंशत्तत्त्वरूपाय श्रीमहात्रिपुरसुंदरीयोगपीठाय नमः इति सर्वांगं संपूज्य हृत्कमले भगवतीं ध्यायन् तत्तेजसा व्याप्तं स्वदेहं श्रीदेवीरूपं विभाव्य ऐं श्रीमहात्रिपुरसुंदरीश्रीपादुकां पूजयामि नमः तर्पयामि नमः इति शिरसि पुष्पांजलिना त्रिः संपूज्य पुरः स्थापितपा

त्रोदकबिंदुभिः संतर्प्य पुनः प्राग्वन्मूलेन शिरोहृदयगुह्यपादद्व
यसर्वांगेषु पंचपुष्पांजलिभिः संपूज्य संतर्प्य हृदयत्रिकोणेल
यांगतिथिनित्याषोडशनित्या गुरुपंक्तित्रय षडंगयुवती तत्त
त्स्थाने वक्ष्यमाणविधिना संपूज्य संतर्प्य हृदयत्रिकोणसमायां
संहारक्रमेण वाऽवरणशक्तीः शिरस्त्रिकोणपूजायां सृष्टिक्रमेण
वाऽवरणशक्तीः स्वचक्रेश्वरीश्च पूजयेत्तर्पयेत् ततः सर्वचक्रपुष्पांजलि।
पंचकं स्वदेहमस्तकादिस्थाने विधाय धूपदीपौ निवेद्य श्रीतद्देवं नैक

यीत्त् तत्र मूलाधारे चतुरस्रं वह्निकुंडं विभाव्य तन्मध्ये कालाग्नि
मेव वासनेंधनज्वालितं प्राणादिसंधुक्षितं कुंडलिनी रूपं देव
तारूपि स्थितं चिदग्निमंडलं विभाव्य ॐ धर्माधर्म हविर्दीप्ते आत्मा
ग्नौ मनसा स्रुचा सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं स्वा
हा इति पुण्यपापकृत्याकृत्यसंकल्पधर्मात्मकं हविः समर्पकं हुत्वा
ॐ प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचं धर्माधर्मकलास्नेह
पूर्णं वह्नौ जुहोम्यहं स्वाहा इति पूर्णां हुत्वा निरस्ताखिलप्रपंचो।

निष्कलब्रह्मरूपः साधकः कियत्क्षणं तिष्ठेत् देवीरूपमात्मा
नं ध्यात्वा श्रीगुरुं प्रणम्य शिरस्यः ऽन्नपूर्णां ध्यात्वा तन्मंत्रेणामं
पूज्य शिवपूजावशिष्टं तत्पात्रस्थमुदकं श्रीगुरुपादुकामूल
विद्याभ्यां ॐ ऽलिन्यात्मकश्रीपरदेवताशुखेन्द्र होमीति त्रुद्धा
मुद्राद्वितीयखंडेन सहप्राश्य श्रीपरदेवतारूपमात्मानं ध्याय
न् प्राणायामादिपूर्वकं मूलं यथाशक्ति जप्त्वा पुनः प्राणाया
मादिना जपं समर्प्य स्तुत्वा प्रणमेदित्यात्मपूजा अथ योगपीठपूजा

पीठपरिमाणं चतुर्विंशत्यंगुलं

261

पृ.
२६१
261

योगपीठं त्वथः कुर्यान्मौवर्णं राजतं तथा तत्वांगुलं परीमाणं प
त्रिणाद्धं कलामितं तत्र मेखलायुक्तमथ्यं तं नवयोन्या समन्वितं
अष्टपत्रादिसंयुक्तं कर्णिकाकेसरान्वितं विचित्रशोभासंयुक्तं
पंचपेताद्यतं सदा तस्मिन्महायोगपीठे पूजयेत्परदेवतां तत्र
स्वर्णादिसिंहासने भरतोयंत्रं संस्थाप्य सामान्यार्घोदकेनाभ्यु
क्ष्य स्ववामतः पीठोपरि ॐ श्रीगुरुपादुकाम्बुद्धार्य श्रीमच्छ्रीत्र
म्बकानंदनाथश्रीपादुकां पूजयामि नमः इति संपूज्य दक्षभागे

ॐ गं गणपतिश्रीपादुकां पूजयामि नमः इति संपूज्य सर्वाधा
स्याधारभूतोऽपर्युपरि ॐ मंडूकाय नमः ॐ कालाग्निरुद्राय नमः
ॐ मूलप्रकृत्यै नमः ॐ आधारशक्त्यै नमः ॐ कूर्माय नमः ॐ अनं
ताय नमः ॐ वराहाय नमः ॐ पृथिव्यै नमः इति संपूज्य पृथ्व्यां ॐ
स्वधासमुद्राय नमः ॐ इक्षुरससमुद्राय नमः ॐ मदिरासमुद्रायन
मः ॐ क्षारसमुद्राय नमः ॐ दधिसमुद्राय नमः ॐ घृतसमुद्राय नमः
ॐ दुग्धसमुद्राय नमः इति संपूज्य तन्मध्ये श्रीं श्रीं इत्यादिद्वीपांतः नव।

262

पृ.
२६२
262

खंडविराजितायनवरत्नमयद्वीपायनमः तत्पश्चिमे ग्रं ग्रां ईं ई
ऊं ऊं ऋं ऋं ॠ ॠ पुष्परत्नायनमः नैर्ऋते लृं लॄं एं ऐं ओं औं अं अः वैडूर्यरत्ना
यनमः दक्षिणे कं ङं नीलरत्नायनमः आग्नेये चं ञं विद्रुमरत्ना
यनमः पूर्वे टं णं मौक्तिकरत्नायनमः ईशाने तं नं मरकतरत्नाय
नमः उत्तरे पं मं वज्ररत्नायनमः वायव्ये यं ळं गोमेदरत्नायनमः
क्षं शं सं पद्मरागरत्नायनमः तन्मध्ये खंडमध्ये स्वर्णपर्वतायनमः
तदुपरि नंदनोद्यानायनमः तन्मध्ये कल्पवृक्षेभ्योनमः तन्मध्ये

गायत्र्यावामसंभूषिते एवंध्यायेन्महाप्रेतंब्रह्मणोरूप
मास्थिते॥ वायव्ये धं लोकाधिपतयेब्रह्मणेनमः
ब्रह्मप्रेतासनश्रीपादुकांपूजयामिनमः वामांसेविष्णु
प्रेतेतनवमेघसमप्रभं वनमालाधरंपीतवसनंसु
कुटाहृतं शंखचक्रंगदापद्मंधारयंतंमनोहरं गरुडा
सनसंस्थंचश्रीवत्सकौस्तुभांकितं स्वसमानमहालक्ष्मा
सेवितंवामभागके एवंध्यायेन्महाप्रेतं विष्णुरूपंमहाद्युतिं॥

263

पृ०
२६३

263

ईशाने ॐ वां अपामधिपतये विसवेनमः विसप्रेता
सनश्रीपादुकांपूजयामिनमः ॥ दक्षोरेरुद्रप्रेतेत
रक्तवर्णंचतुर्भुजं त्रिशूलखट्वांगधरंमुंडमालाविभूषितं
चंद्रमौलिंत्रिनेत्रंचवरदाभयपाणिकं विभूतिभूषितंस
र्पभूषणंवृषभासनं स्वसमानमहागौर्यावामांगेसेवि
तंसदा एवंध्यायेन्महाप्रेतंरुद्ररूपंमहाबलं ॥
आग्नेये ॐ रांतेजोधिपतयेरुद्रायनमः रुद्रप्रेतासनश्रीपा

दुकांपूजयामिनमः ॥ वामोरावीश्वरंप्रेतंशुद्धस्फटि
कसन्निभं सिंहचर्मपरीधानंगजचर्मोत्तरीयकं तथा
द्विकलशंशूलंवरंचाभयमेवच धारयंतंकरांभोजैः श
शांकक्रुतशेखरं स्वसमानमहाशक्त्यासेवितंत्रिदशा
र्चितं प्रेतासनेमहादेवंस्मेरवक्त्रंमहाबलं गंगाधरंज
टाजूटमंडितंचत्रिलोचनं एवंध्यायेन्महाप्रेतमीश्वरंस
र्वसिद्धिदं ॥ नैरृते पं यांवायव्यधिपतयेईश्वरायनमः ई

पू॰

२६४

स्वरप्रेतासनश्रीपादुकांपूजयामिनमः ॥ शिरस्सिंसंस्म
रेत्प्रेतेसदाशिवमयंपरं माणिक्यवर्णमुत्तानशायितेप
रमाद्भुतं उदकशीर्षचहिमभुजेवराभयकरांबुजे सचेत
नेप्रहसंतमहहासससमाकुले त्रिनेत्रंचंद्रमुकुटंसदामु
दितमानसं प्रेतासनंमहाप्रेतंसंस्मरेत्साधकोत्तमः ॥
मध्ये धं ह्सौंः वियदधिपतयेसदाशिवायनमः सदाशि
वमहाप्रेतपद्मासनश्रीपादुकांपूजयामिनमः इतिसंपूज्य

263/2

264

विज्ञालायनमः प्रकृतिमयपत्रेभ्योनमः विकृतमयकेसरेभ्यो
नमः पंचाशद्वर्णवीजाव्यसवेतत्वरूपायैकर्णिकायैनमः त
स्यामेव अंअर्कमंडलायनमः ॐसोममंडलायनमः रंवह्निमंड
लायनमः संप्रबोधात्मनेसत्वायनमः रंप्रकृत्यात्मनेरजसेनमः
तंमोहात्मनेतमसेनमः ग्रांग्रात्मनेनमः अंअंतरात्मनेनमः पं
परमात्मनेनमः ह्रींज्ञानात्मनेनमः कर्णिकायांदिक्षुमध्येच ज्ञा
नतत्वात्मनेनमः मायातत्वात्मनेनमः कलातत्वात्मनेनमः विद्या

पु.
२६५

264

तत्वात्मनेनमः परतत्वात्मनेनमः ऋींसर्वशक्तिकमलासना
यनमः तन्मध्ये म्राग्रादिप्राग्दक्षिणेपेन मोहिन्यैनमः भोगिन्यै
नमः वज्रिण्यैनमः स्तंभिन्यैनमः आकर्षिण्यैनमः द्राविण्यैन
मः आह्लादिन्यैनमः क्लेदिन्यैनमः तदुपरि समस्तप्रकटगुप्त
गुप्ततरसंप्रदायकुलकौलनिगर्भरहस्यपरापररहस्यपराप
रातिरहस्ययोगिनीचक्रपादुकाभ्योनमः इतिसंपूज्य तदुपरि
श्रीचक्रंविभाव्य बिंदुचक्रे मूलविद्या ॐह्रींश्रींभगवतिश्रूनि।

त्येकामेश्वरिह्रींसर्वजनवशंकरिसः त्रिपुरभैरविऐंऐंवि
च्चेह्रींश्रींमहात्रिपुरसुंदर्यंबाश्रीपादुकांपूजयामिनमः
इतिस्वर्णविद्ययात्रिःसंपूज्य पुनःमूलेनचत्रिःसंपूज्य श्रीच
क्रंपुरत्रयात्मकंध्यात्वा चतुरस्रत्रयषोडशदलाऽष्टदलात्म
केप्रथमचक्रे ॐऐंह्रींश्रींप्रथमकूटंशारीरात्मनेनमः चतु
र्दशारदशारद्वयात्मकेमध्यचक्रे ॐऐंह्रींश्रींद्वितीयकूटंतुर्या
त्मनेनमः अष्टारत्रिकोणबिंद्वात्मकांतश्चक्रे ॐऐंह्रींश्रींतृतीय

266

ईशाने द्वितीयकूटं स[illegible]गिरिपीठायनमः आग्नेये तृतीयकूटं
जालंधरपीठायनमः मध्ये बिंदौ तुरीयविद्यां महोड्यानपीठा
यनमः इति संपूज्य पुनः बिंदौ महोड्यानपीठ हिरण्मयसह
स्रदलकमलासनायनमः इति संपूज्य चतुरस्र षोडशदलाष्ट
दलेषु अं आं सौः त्रिपुरासर्वाणवासनायनमः १ चतुर्दशारे ऐं
क्लीं सौः त्रिपुरेश्वरीपोतांबुजासनायनमः २ ह्रीं क्लीं सौः त्रिपुरसुं
दरीदेव्यात्मासनायनमः ३ अंतर्दशारे हैं ह्कलीं ह्सौः त्रिपुरवा।

पू.
२६७

स्मिनीसर्वचक्रासनायनमः ४ अष्टकोणे ह्लैंःहसकलीह्लौंः
त्रिपुराश्रीसर्वमंत्रासनायनमः ५ सविंदुत्रिकोणे ह्रींक्लींब्लीं
त्रिपुरमालिनीसाध्यसिद्धासनायनमः ६ एवोंक्तषडासनानि
संपूज्य चतुरस्रे नादशक्तिपादुकांपूजयामिनमः षोडशा
दले विंदुशक्तिश्रीपादु॰ अष्टदले कमलाशक्तिश्रीपादुकां॰
चतुर्दशारे ज्येष्ठाशक्तिश्रीपादु॰ बाह्यदशारे रौद्रीशक्तिश्रीपादु॰
अंतर्दशारे वामाशक्तिश्रीपादु॰ अष्टकोणे विषघ्नीशक्तिश्रीपा॰

266

त्रिकोणे हृतरीशक्तिश्रीपादुकांपूजयामिनमः विंदौ सर्वा।
नंदशक्तिश्रीपादुकांपूजयामिनमः इतिनवशक्तीःसंपूज्य
षट्त्रिंशत्तत्वात्मकंश्रीचक्रंध्यात्वा ॐ ऐं ह्रीं श्रीमित्यादिक्षांतःशिव।
शक्तिसदाशिवेश्वरशुद्धविद्यामायाकलाविद्यारागकालनिय
तिपुरुषप्रकृतिरहंकारबुद्धिमनःश्रोत्रत्वक्चक्षुःजिह्वाघ्राण।
वाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवाय्वग्निसलि
लपृथिव्यात्मनेश्रीमहात्रिपुरसुंदर्यायोगपीठासनायनमःइति

268

प.
२६८

268

समस्तपीठं पुष्पांजलिना संपूज्य ततस्तदुपरि प्रसूनतूलिकां कल्पयामीति मध्ये पुष्पं निक्षिप्य तदुपरि ह्रीं श्रीं सौः महात्रिपुर सुंदर्या सकलचैतन्यानंदमयीं श्रीकामेश्वरकामेश्वरीमूर्त्तिं कल्पयामीति पुष्पादि प्रक्षेपेण ध्यानोक्तां मूर्त्तिं भावयन् शक्त्यास्या पनमुद्रां प्रदर्श्य मूलमुच्चार्य परस्यै कामेश्वरीमूर्त्त्यै नमः इति कल्पितमूर्त्तिं पूजयेत् इति योगपीठपूजा अथ श्रीचक्रपूजा तत्र प्रा गवच्छ्रीगुरुं शिरसि संपूज्य नमोस्तु गुरवे तस्मा इष्टदेवस्वरूपिणे

यस्यवागमृतंहंतिविषंसंसारसंज्ञितं इतिसंपठ्य श्रीगुरोर्दक्षि
णामूर्त्तेभक्तानुग्रहविग्रह अनुज्ञांदेहिभगवन्श्रीचक्रयजा।
नायमे इतिश्रीगुर्वाज्ञांप्राप्य प्राणायामऋष्यादिकरषडंगन्या
संविधाय मूलेनव्यापकंविन्यस्य पुष्पांजलिमादाय मातृकां
भोजकत्वेनकल्पयित्वा त्रिखंडामुद्रांबद्ध्वा हृदिश्रीचक्रेदेवीय
थोक्तरूपांसपरिवारांध्यात्वा तेजोरूपांध्यायंतमुद्राप्रयोगेनमू।
लाधारात्कुंडलिनीमुत्थाप्य तयासहषट्चक्रभेदक्रमेणहृद

प्र.
२६९.

269

यांतःस्फुरंतीं तां तेजोमयीं सुषुम्णामार्गेण ब्रह्मरंध्रं नीत्वा पर
तेजःसंगमेनामृतमहांबुयौगत्वं विधाय शिवशक्तिसामरस्य
मनुभूय ॐ ऐं ह्रीं श्रीं ह्सैं ह्स्क्ल्रीं ह्सौः नमो भगवति महात्रिपुरसुं
दरि महापद्मवनांतःस्थे कारणानंदविग्रहे सर्वभूतहिते मात
रेह्येहि परमेश्वरि एह्येहि देवदेवेशि त्रिपुरे देवपूजिते परामृत
मयेशीघ्रं सान्निध्यं कुरु सिद्धये देवेशि भक्तिसुलभे परिवारसम
न्विते यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव इत्यावाहनमंत्र।

मुद्रार्थं वहन्नासापुटाध्वनात्रिखंडमुद्रामुद्रितकरस्य पुष्पां
जलौ तत्तेजः समानीय पीठांतः कल्पितमूर्तेः शिरसि ब्रह्मरंध्रे
संनिवेश्य कामेश्वरांकस्थां सावरणां श्रीमहात्रिपुरसुंदरीं सा।
ंगावयवभावेन भावयन् मूलतृतीयकूटं श्रीमहात्रिपुरसुंदरि
इहागच्छ २ इह तिष्ठ २ इह सन्निधेहि २ इह सन्निरुद्धस्व २ इह सं
मुखीभव २ इहावगुंठितभव भव षडंगेन सकलीकृत्य अमृतीकृ
त्य परमीकृत्य इत्यावाहनादिनवमुद्राः प्रदर्श्य ततो मूलविद्यां

270

ह.
१७०
270

ते ऐं वद वद वाग्वादिनि ऐं क्लीं क्लिन्ने क्लेदिनि क्लेदय महा।
क्षोभं कुरु २ ऐं क्लीं सौः मोक्षं कुरु २ सौः ह्सौः इति दीपिनीमा
न्त्रकांचोच्चार्य सामान्यार्घ्यजलेन देवीं त्रिः प्रोक्ष्य श्रीं ह्रीं क्लीं ग
णाय कालिके सौः सकल ह्रीं क्लीं ह्रीं ह्रीं श्रीं इति जीवन्यासवि।
धया देव्या हृदयकमले जीवं संस्थाप्य प्राणप्रतिष्ठां कुर्याद्यथा
ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं ह्रौं हंसः सोऽहं महात्रिपुरसुंद।
र्याः प्राणा इह प्राणा ॐ आं ह्रीं क्रों यं ७ ह्रौं हंसः सोऽहं महात्रिपु

रसुंदर्याः जीव इह स्थितः ॐ आं ह्रीं क्रों यं ३ ह्रौं हंसः सोहं मा

हात्रिपुरसुंदर्याः सर्वेंद्रियाणि इह स्थितानि ॐ ओं आं ह्रीं क्रों

यं ३ ह्रौं हंसः सोहं महात्रिपुरसुंदर्याः वाङ्मनस्त्वक्चक्षुः श्रोत्र

घ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा इति प्राणप्रतिष्ठां

लेलिहानमुद्रया विधाय संक्षोभणद्रावणाकर्षणवश्योन्माद

महांकुशखेचरीबीजयोन्याख्यानवमुद्राः प्रदर्श्य द्रां द्रीं क्लीं ब्लूं सः क्रों

हसखफ्रें ह्सौः ऐं इति बीजकैकं एवं क्रमेकैकां मुद्रां प्रदर्श्य आं ह्रीं

271

पु.
२७१

271

इतिपाशमुद्रां क्रोंक्रोंमित्यंकुशमुद्रां यंयंइतियन्तुमुद्रां ह्रांह्रीं
क्लींब्लूंसः यांरांलांवांसांइतिबाणमुद्रांप्रदर्श्य मूलंश्रीमहात्रि
पुरसुंदरीश्रीपादुकांपूजयामिनमः इतिपुष्पांजलित्रयेणश्री
देवींसंपूज्य मूलंश्रीमहात्रिपुरसुंदरीश्रीपादुकांतर्पयामिनमः
इतितत्त्वमुद्रयाविशेषार्घ्यामृतविंदुभिः त्रिरष्टोत्तरशतावधि
यथाशक्तिपरदेवतामुखेसंतर्प्य आसनादिषोडशोपचारैःपूजये
त् तत्रमूलंभगवतिश्रीमहात्रिपुरसुंदरीत्त्वमासनंकल्पया

मित्यासनंभवत्या इत्यासने देवीं वामभागे निवेश्य सिंहास
नस्थदीपमस्तु ह्राचप्रदर्श्य प्रणम्य ॐ ह्रं ह्रं ह्रं ॐ ऐं ह्रीं श्रीं ऋं ऋं ऌं
ॡं ऌं ॡं ब्रह्मणे स्वाहा इति प्रार्थनी सद्यानिवेद्य मूलं श्रीमहात्रिपु
रसुंदरी श्रीपादुकां पूजयामि नमः इति पुष्पांजलिं क्षिपेत् मूलं
श्रीमहात्रिपुरसुंदरी श्रीपादुकायै अर्घ्यं कल्पयामि स्वाहा इति सा
मान्यार्घ्योदकेन शिरसि पुनर्मूलं श्रीमहात्रिपुरसुंदरी श्रीपादुकां
पूजयामि नमः इति पुष्पांजलिभिः संपूज्य मूलं श्रीमहात्रिपुरसुंद

272

पाद्यशेषंनिवारयेत्=

प.
१७२
272

रीश्रीपादुकायैपाद्यंकल्पयामिनमः इतिपादयोःपाद्यपात्रात्पा
द्यंदत्वा पुष्पांजलिंचदद्यात् मूलंश्रीमहात्रिपुरसुंदरीश्रीपादुका
यैआचमनीयंकल्पयामिस्वाहा इतिमुखेआचमनीयंदद्यात् पुनः
पुष्पांजलिंदद्यात् मूलंश्रीमहात्रिपुरसुंदरीपादुकायैमधुपर्कंक
ल्पयामिस्वधा मुखेमधुपर्कं पुनःपुष्पांजलिं ततःआचमनीयं त
तः ॐपादुकेपरिधायस्वत्रिपुरेरत्ननिर्मिते स्नानमंडपमायाहिस्ना
नार्थंशक्रादिग्नंत इतिरत्नपादुकेपरिधाय प्रधानमंडपात्स्नानमं

उपनीत्वा स्नानवस्त्रं परिधाप्य स्वर्णासने समुपवेश्य प्रागवदर्घ्य
पाद्याचमनीयानि दत्वा कर्पूरशकलैर्दन्तधावनं कारयित्वा सुगं
धजलैर्गण्डूषं मुखप्रक्षालनं च कारयित्वा मूलेश्रीमहात्रिपुरसुंद
रीश्रीपादुकायै स्नानं कल्पयामि नमः इति स्नानीयद्रव्याणि परिक
ल्प्य प्रागवत्पुष्पांजलिं निवेद्य महाराजोपचारवदभ्यंगोद्वर्तनकेश
साधनानि विधायोष्णोदकेन निर्मलस्नानं कारयित्वा वैदिकपौरा
णिकमंत्रैः पंचगव्यैः पंचामृतेन च स्नापयित्वा पुनः शुद्धजलेन स्नाप

ए.

यित्वा पुनः जलेनाभिषिच्य देवांगनाभिः स्ववर्णपदिव्यैर्नानाती
र्थोपहृतजलैः स्नपयित्वा प्रागवत्पुष्पांजलिं मूलेन दत्वा आचम
नीयं कल्पयित्वा केशमार्जनाय वस्त्रं दत्वा जलप्रच्यावनं कारयि
त्वा नानारत्नखचितं रत्नदुकूलद्वयं वंइति प्रोच्य मूलेनाभिमंत्र्य
मूलं श्रीमहात्रिपुरसुंदरीश्रीपादुकायै वाससी परिकल्पयामि नमः
इति परिधाप्य पुनराचमनीयं दत्वा प्रागवत्पुष्पांजलिना प्रपूज्य पट्ट
सूत्रद्वयं स्वर्णादिरचितं चकंठसूत्रं विष्णुदेवतायकंठसूत्राय नमः

इतिसंपूज्य मूलं श्रीमहात्रिपुरसुंदरीश्रीपादुकायैकंठसूत्रं
परिकल्पयामिनमः इतिसमर्प्य मूलं श्रीमहात्रिपुरसुंदरीपा
दुकेपरियायस्वत्रिपुरेरत्ननिर्मिते आगच्छनिर्मितरम्यमलंका
रस्यमंडपं इतिप्रार्थ्यालंकारमंडपंनीत्वा सिंहासनेसमुपवेश्या
ऽलंकारान्पुरतोनिधाय वमितिप्रोक्ष्य मूलेनाभिमंत्र्य विष्णुदेवा
तेभ्योऽलंकारेभ्योनमः इतिसंपूज्य मूलं श्रीमहात्रिपुरसुंदरीश्री
पादुकायैमुकुटाद्यलंकरणानिकल्पयामिनमः इतिसामान्यत

प्र.
१७४

उत्सृज्य विशेषतो मुकुटं परिकल्पयामि नमः इति मुकुटाद्यलं-
कारैरलंकृत्य सर्वं वस्त्रग्रंथिं जलं दत्वा रत्नपादुके उपनीय मूलं
श्रीमहात्रिपुरसुंदरि पादुकायुगमारुह्य पंचवाद्यपुरःसरं याग
मंडपमायाहि परिवारगणैः सह इति प्रार्थ्य छत्रचामरादिनानो-
पकरणैः सखीभिः परिवारदेवताभिः सह यागमंडपं नीत्वा का-
मेश्वरांके भगवतीमुपवेश्य परिवारदेवताश्च यथास्थानेषूपवे-
शयेत् लोहितांगुलित्राणचापबाणपाशसृणीन् करैः दधानां काम

2 7 4

राज्ञांकेयजितांमुदितांस्मरेत् इतिपरदेवतांध्यात्वा मूलेनपुष्पां
जलित्रयंदत्वा विश्वदैवतायगंधायनमः इतिगंधंसमर्प्य ॐप
रमानंदसौरभ्यपरिपूर्णदिगंतरं गृहाणपरमंगंधंकृपयापरमे
श्वरि मूलंश्रीमहात्रिपुरसुंदरीश्रीपादुकायैगंधंकल्पयामिनमः
इतिमुद्रांवितिलकंकुर्यात् प्राग्वत्पुष्पांजलिंदत्वा गंधमुद्रांप्रदर्श्य तु
रीयवनसंभूतनानागंधमनोहरं आनंदसौरभंपुष्पं गृह्यतामिव।
वाञ्छितं मूलंश्रीमहात्रिपुरसुंदरीश्रीपादुकायैपुष्पाणिकल्पयामि

275

पु.
२७५
275

वौषट् इति शिरसि पुष्पाणि समर्प्य पुष्पमुद्रां प्रदर्श्य एवं वत्पुष्पां
जलिं दत्त्वा धूपग्राहिण्यां निर्धूमाङ्गाराय धूपाय वमिति प्रोक्ष्याऽमृ
तीकृत्य ह्रीं सुरभिते जसे स्वाहा इति तत्र गुग्गुलादि निक्षिप्य ॐ गं
धूपदेवतायै धूपाय नमः इति धूपं संपूज्य वामतर्जन्या संस्पृशन्
मूलं दशाङ्गधूपसौगन्ध्यमर्पयामि महेश्वरि सर्वसौभाग्यदं धूपं
गृहाण त्रिपुरेश्वरि वनस्पतिरसोत्पन्नो गन्धाढ्यो गन्ध उत्तमः आघ्रेयः
सर्वदेवानां धूपोऽयं प्रतिगृह्यतां मूलं श्रीमहात्रिपुरसुन्दरी श्रीपादुका

यैधूपंकल्पयामिनमः मध्यानामांगुष्ठैर्धूपंदत्वा इतिधूपमुद्रयाध
पमुत्सृज्य वामभागेघंटांनिधायअस्त्रेणप्रोक्ष्यामृतीकृत्य पुनरस्त्रे
णगंधादिनासंपूज्य ॐजगद्ध्वनिमंत्रमातः स्वाहा इत्यभिमंत्र्य तां
वामहस्तेनवादयन् दक्षेणधूपपात्रंचालयन्नीचैर्धूपंनिवेद्य ता।
पात्रंदेवीवामेनिधाय तथैव दीपपात्रंह्रीमितिप्रज्वाल्यअमृतीकृ
त्य विश्वदैवताय दीपायनमः इतिसंपूज्य वाममध्यमया दीपपा
त्रंसंस्पृशन्नितिसंपूज्य मूलं कर्पूरवर्तिकायुक्तंस्वर्णपात्रस्थंमविके

276

सू.
२८८

276

दीपं गृहाण देवेशि श्रीमत्त्रिपुरसुंदरी स्वप्रकाशो महादीपः सर्व
त्रतिमिरापहः सबाह्याभ्यंतरं ज्योतिर्दीपोयं प्रतिगृह्यतां मूलं
श्रीमहात्रिपुरसुंदरी श्रीपादुकायै दीपं परिकल्पयामि नमः
मध्यानामामध्ये दीपपात्रमंगुष्ठेन धृत्वा इति दीपमुद्रया दीपा
मुत्सृज्य निवेद्य घंटावादनपूर्वकं च देव्यै दीपं प्रदर्श्य तस्यां च देवी द
क्षे निधाय देव्यग्रे चतुरस्रमंडलं विधाय तत्र स्वर्णादि पात्रे नाना
नैवेद्यं निधाय मूलेन निरीक्षा मंत्रेण प्रोक्षणेनैव कुंभैः संताड्य

कवचेनावगुंठ्याऽमृतस्य च ॐ ह्रं सः वौषट् इति मन्त्रयाभिमंत्र्ये।
णजलेन प्रोक्ष्य चक्रमुद्रां प्रदर्श्य यमिति मन्त्रयाजपंसृक्तनदो
षं संशोध्य रमिति तत्दाह संदह्य वमित्यमृतीकृत्य मूलेन विशे
षार्घ्यविंदुभिः प्रोक्ष्य विश्वदेवताय नैवेद्याय नमः इति मंत्रेण अ
स्त्रेण संरक्ष्य मूलेन मन्त्रयाभिमंत्र्य ॐ क्लीं कामधुक्त्वे अमोघे वरदे वि
च्चे स्फुर स्फुर ग्लौं ग्लौं ग्लौं इति श्रीकामधेनुविद्यया धेनुमुद्रयाऽमृतीकृ
त्य महामुद्रया परमीकृत्य पाद्याचमनीयप्रागवदत्त्वा मूलेन देवीं सं

277

ए.
२७७

2770

स्य पात्रांतरे जलममृतीकृत्य चुलकेनादाय वामकरांगुष्टेन नैवे
द्यपात्रं स्पृशन् मूलं मांगायै मायुधायै सपरिवारायै सर्वात्मिकायै
भगवत्यै श्रीमहात्रिपुरसुंदरी श्रीपादुकायै नैवेद्यं कल्पयामि न
मः इति नैवेद्योपरि चुलकोदकं समर्पयेत् ततः कृतांजलिः मूलं
श्रीमहात्रिपुरसुंदरि हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतं पंचा
या षड्रसोपेतं गृहाण परमेश्वरि इत्यन्नं निवेद्य कर्मणा हृष्टिदेहेन
सुप्रसन्नेन चेतसा गृहाण ग्राह्यमिदमन्नममृतं परमेश्वरि पात्रांतरे

जलममृतीकृत्य ॐ अमृतोपस्तरणमसि स्वाहा मूलं श्रीमहात्रि
पुरसुंदरीश्रीपादुकायै आपोशानं कल्पयामि स्वधा इत्यापोशा
नं दत्वा ततः वामकरेण ग्रासमुद्रां प्रदर्श्य दक्षकरेण प्राणादिपं
च मुद्राः प्रदर्शयेत् ऐं ॐ प्राणाय स्वाहा इत्यंगुष्ठेन कनिष्ठानामिका
स्पृशेत् ह्रीं ॐ अपानाय स्वाहा इत्यंगुष्ठेन तर्जनीमध्यमे स्पृशेत् सौः
ॐ व्यानाय स्वाहा इत्यंगुष्ठेन अनामिकामध्यमे स्पृशेत् ॐ ऐं ह्रीं उदाना
य स्वाहा इत्यंगुष्ठेनानामिकामध्यमातर्जनीः स्पृशेत् ऐं ह्रीं सौः समा

2.78

प. २७८

2-78

यस्याह्वा इसंगुष्ठेन सर्वाः स्पृशेत् इति प्राणादिपंचमुद्राः प्रदर्श्य कृतांजलिः मूलं ऐं आत्मतत्त्वव्यापिका श्रीमहात्रिपुरसुंदरी तृप्यतु मूलं क्लीं विद्यातत्त्वव्यापिका श्रीमहात्रिपुरसुंदरी तृप्यतु मूलं सौः शिवतत्त्वव्यापिका श्रीमहात्रिपुरसुंदरी तृप्यतु मूलं ऐं क्लीं सौः सर्वतत्त्वव्यापिका श्रीमहात्रिपुरसुंदरी तृप्यतु इति तत्त्वैः ग्रासमाच नष्टं यथा ग्राहयित्वा नैवेद्यमुद्रां प्रदर्शयेत् मूलं श्रीमहात्रिपुरसुंदरि चित्पात्रे मद्दत्तैः सोपस्करैर्विविधानेकभक्ष्याणि निवेदयामि नैवेद्यमिमा

द्रुगायैजघाणतदित्यनेनपुष्पांजलिंसमर्प्य नैवेद्यजातंतदा
स्येनदेव्यैसपरिवारायैनिवेदयेत् ततःसुगंधजलममृतोद्भ
त्य मूलंश्रीमहात्रिपुरसुंदरि नमस्तेदेवदेवेशिसर्ववत्सिकारण
रं अन्नानिवेदितंशुद्धंप्रकृतिस्थंसुशीतलं अमृतानंदसंपूर्णंगृ
हाणजलमुत्तमं इतिजलंनिवेद्य अस्त्रेणजवनिकयाभोजनस्थ
लंसंवेष्ट्य घंटांवादयन् ब्रह्मेशाद्यैःसरसमभितःसूपविष्टैःसमं
तात्सिंचद्बालव्यजननिकरैःवीज्यमानासखीभिः नर्मक्रीडाप्रहस

279

पु० २७९

279

नपरांपंक्तिभोक्तृं हसंतीभुंक्ते पात्रे कनकघटिते षड्रसांस्त्रिहि
लासा इतिभुंजानांध्यात्वा मूलंदशधाजप्त्वासमर्प्य भुक्तवंती
स्तत्प्रोदेवीविभाव्य पात्रांतरेजलमभ्यस्तीकृत्य ॐअमृतापिधा
नमसिस्वाहा इतिदत्वाहस्तेउत्तरापोशानंदत्वा गतसारंनैवेद्यंस
मुद्धृत्य ॐऐंनमः उच्छिष्टचांडालिमातंगिनिसर्ववशंकरिस्वाहा
श्रीशेषिकाश्रीपादुकांपूजयामि इतिशेषिकायैनिर्माल्यवासिन्यै
इदमुच्छिष्टभोजनंकल्पयामिनमः इत्यैशान्यांत्रिकोणेक्षिपेत् अ

स्तायकडितिस्थाने प्रोक्तपाद्भिः संशोध्य हस्तमुखप्रक्षालनार्थं ज
लं उद्वर्तनादि च दत्वा तस्याश्चरणौ प्रक्षाल्य आचमनीयं दत्वा तत
स्तांबूलं प्रोक्ष्य वनस्पतिदेवताय तांबूलाय नमः इति संपूज्य मूलं
श्रीमहात्रिपुरसुंदरि तमालदलकर्पूरपूगभारतरंगितं संशोधि
तं सुगंधं च तांबूलं प्रतिगृह्यतां तांबूलं स्वादु संमिष्टं शुद्धिवृद्धिप्रदा
यकं मया निवेदितं तुभ्यं गृहाण मम सिद्धये ऐं ह्रूं ह्रें ह्रैं रंदं रंदं रंदं र
हाणस्वाहा इति तांबूलं निवेद्य योनिमुद्रया प्रणम्य मूलं श्रीमहा।

मैश्वर्यंदेहिदेविनमोस्तुते इति देव्यैसमर्प्य कृतयास्रजासां।

गनाय्समानिदक्षिणांसमर्पयामिनमः तत्रदेवींध्यात्वा मूले
नग्रहस्व ज्वालाशुद्धौमंत्रेणाध्यमर्घ्यं निवेदयामीतिनि।
वेदयेत् इतिवलिंदत्वा मूलदेवीसंपूज्य स्वर्णादिपात्रस्थं
जलममृतीकृत्य मूलेनत्रिरभिमंत्र्य मूलंश्रीमहात्रिपु।
रसुंदरीश्रीपादुकायैसमर्पयामिनमः इतिसप्तुग्रहस्व
सलिलंपावनंदेविशीतलंसमनोहरं मयानिवेदितंभ
क्त्या गृहाणपरमेश्वरि इतिदेव्यावामेनिवेदयेत् मूलं।

332

श्रीमहात्रिपुरसुन्दरिन्द्रमासीति ज्ञात्वा स्वर्णादिपात्रस्थं
जलं धेन्वामृतीकृत्य मूलेनाभिमंत्र्य ॐ ऐं ह्रीं श्रीं अमृता
पिधानमसि स्वाहा इति देव्याः हस्ते किंचिज्जलं दत्वा तया।
प्राशितं विभाव्य गतसारं नैवेद्यमुद्धृत्य नैर्ऋत्यां संस्था।
प्य अग्रे स्थानं संशोध्य हस्तौ च संशोध्य हस्तक्षालन
जलं दत्वा स्वगंधादि च दत्वा पुनर्हस्तक्षालनजलं दा।
त्वा सुगंधजलैर्गंडूषाणि कारयित्वा चरणौ प्रक्षाल्य

अस्त्रमानीयनिवेश्य वस्त्रेणकरपादयोर्जलमपनीय
सुगंधेनकरौसुरभीकृत्य सुगंधानुलेपनमाल्या-
निसमर्प्य तांबूलंप्राग्वद्दत्वा प्रसन्नपूजांकुर्यात् मू-
लंसुप्रसन्नाश्रीमहात्रिपुरसुंदरीश्रीपादुकांपूजया-
मिनमः इतिपुष्पांजलिभिःसंपूज्य मूलंसुप्रस-
न्नायैश्रीमहात्रिपुरसुंदरीश्रीपादुकायैअर्घ्यंकल्प

यामिस्वाहा । इत्यर्घ्यंदत्वा । गंधादिपूजांप्राग्वन्नि-
वेदयेत् इतिप्रसन्नपूजा ततःप्राणाग्निकांसर्वंव
ह्निधाय ततःकुमारीसूक्तक्रमेणमूलेनपूजये
त् तस्यैशक्तिपात्रंनिवेदयेत् गुरवेगुरुपात्रं तद
भावेगुरुपुत्राय तदभावेशिष्याय तदभावेतत्समाना
यस्वपात्रंशिरसि इतिसंप्रदायः ॥ ॥

ॐ अस्य श्रीत्रिपुरामंत्रस्य दक्षिणामूर्तिऋषिः पंक्तिछंदः श्रीत्रिपुरादे
वता श्रीबीजं ह्रींशक्तिः क्लींकीलकं धर्मार्थकाममोक्षार्थे जपे विनि
योगः एवं ऋष्यादिन्यासः अथ करन्यासः श्रीं ह्रीं क्लीं ऐं सौं अंगुष्ठाभ्यां
नमः ॐ ह्रीं श्रीं तर्जनीभ्यां स्वाहा कएईलह्रीं मध्यमाभ्यां वौषट् हसक
हलह्रीं अनामिकाभ्यां हुं सकलह्रीं कनिष्ठिकाभ्यां वषट् सौः ऐं क्लीं ह्रीं
श्रीं करतलकरपृष्ठाभ्यां फट् एवं षडंगः अथ ध्यानं चंद्रार्कानलकोटि
नीरदरुचिं पाशांकुशाभ्यां युगान् मुंडं खड्गमभीतिमीप्सितवरं हस्तांबु

334

९. जैरष्टभिः कामेशानशवोपरिस्थितिपदां मंत्रवहंतीपरां श्रीचिंता
मणिमंत्रबीजवपुषींध्यायेन्महाषोडशीं इतिस्वहृत्कमलेश्रीमा
हात्रिपुरसुंदरींध्यात्वा गुरूपदिष्टमार्गेणउत्कीलनसंजीवनत्रोटि
त्यशापहरीकरणकुल्लामंत्रसंस्कारांकुर्यात् कंहंसः श्रींह्रींक्लींऐं
सौः ॐह्रींश्रींकएईलह्रींहसकहलह्रींसकलह्रींसौःऐंक्लींह्रींश्रीं
इत्युत्कीलनमंत्रंत्रिर्जपेत् सौःऐंक्लींह्रींश्रींश्रींऐंसौः ॐह्रींश्रींकएईल
ह्रींहसकहलह्रींसकलह्रीं इतिसंजीवनमंत्रंत्रिर्जपेत् ऐंक्लींसौःक

पईल ह्रीं ॐ ह्रीं श्रीं सदाशिवस्य शापं मोचय २ सकल ह्रीं इतिशाप
हारीमंत्रदशधाजप्त्वा ऐं नमः त्रिपुरास्नाय दहदहउरितं क्लीं हनहन
कीशानृसौः त्रिपुरीस्वाहा इत्यस्य मंत्रं त्रिर्जप्त्वा ॐ मूलं ॐ इतिशापहृदय
निवारणार्थं सप्तधाजप्त्वा इतिमंत्रसंस्कारं कृत्वा मालामादाय पात्रेवा
मकरेवानिधाय मूलेन स्नामास्नाद्यौदकेनाभ्युक्ष्य ॐ माले माले महा
माले सर्वशक्तिस्वरूपिणि चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मे सिद्धिदाभव
ॐ सिद्ध्यै नमः इतिगंधादिना संपूज्य गं अविघ्नं कुरु माले त्वं इतिदत्त्वा।

२. करेणमालांगृहीत्वा स्वशिरसिस्वगुरुंकंठेपीतवर्णांविद्यां हृदये
श्रीपरदेवतां श्रीगुरुचरणयोःस्वात्मानंध्यात्वा भ्रूमध्येतेषांचतुर्णा
मैक्यंविभाव्य विशुद्धौवतत्त्रयमेकीकृतमानीय श्रीपरदेवतारूप
त्वेनध्यात्वा शनैश्शनैर्मूलंपठन् यथाशक्तिजपंसमाप्य त्वंमालेस
र्वदेवानांप्रीतिदाशुभदामम शुभंकुरुष्वमेभद्रेयशोवीर्यंचसर्वदा
इतिमालांशिरसिसंस्थाप्य पुनरपिप्राणायामऋष्यादिकरषडंगन्या
सान्विधाय कामेश्वरमंत्रंदशधाजप्त्वा संपुटमंत्रंजपित्वा सकलह्रीं

335

श्रींह्रींक्लींऐंसौः ॐह्रींश्रींकएईलह्रींहसकहलह्रींसौःऐंक्लींह्रीं

श्रीं इतिसंपुटमंत्रंविजप्य ॐतत्सदिति· इतिसामान्यार्घ्यामृतेनदे।

व्यावामहस्तेतेजोमयंजपफलंसमर्प्य योनिमुद्रयाप्रणमेत्

मालांमूलेनसंपूज्य रहःस्थापयेत् ततोमूलेनदेव्यैपुष्पांजलिंद

त्वा कवचसहस्रनामस्तोत्रपाठंविरचय्य ततःस्तोत्रंपठेत् निषक्त

मणिपादुकंनियमिताघकोलाहलंस्फुरत्किशलयारुणंनखस

मुल्लसच्चन्द्रिकं परामृतसरोवरोदितसरोजरोचिःस्फुरद्भजामि

336

336

२. शिरसिस्थितं गुरुपदारविंदद्वयं । ब्रह्मरंध्रसरसीरुहोदरे नित्य
लग्नमवदातमद्भुतं कुंडलीविवरकांडशोभितं द्वादशार्णस
रसीरुहं भजे २ तस्यकंदलितकर्णिकापुटे क्लृप्तरेखमकथा
दिरेखया कोणलक्षितहलक्षमंडले भावलक्ष्यमबलालयं भ
जे ३ तत्पुटे पटुतडित्कडारिमस्पर्धमानमणिपाटलप्रभं चिंत
यामि हृदि चिन्मयं वपुर्बिंदुनादमणिपीठमंडलं ४ ऊर्ध्वमस्य हु
तभुक्शिखात्रयं तद्विलासपरिबृंहणास्पदं विश्वघस्मरमयच्छ

दोःकण्ठव्याहृणानिसृगमादिहन्नयोः ५ तन्नाथचरणारविंदयो :
संविदामृतकरीमरिंदयोः द्वंद्वमिंदुमकरंदशीतलेमानसंस्मर
स्मिमंगलास्पदं ६ पादुकापंचकस्तोत्रंपंचवक्त्रमुखोद्गतं पंचवा
क्त्रक्रमप्राप्तंप्रपंचेदुर्लभंस्मृतं ७ गुरुस्तोत्रंविधायेदंयस्याङ्गंगप्र
णमेत्सुधीः शेषकर्मसमाप्येवंसाधकस्तन्मयोभवेत् ८ भ्रमो
स्खलितपादानांभूमिरेवावलंबनं त्वयिजातापराधानांत्वमेवशर
णंशिवे ९ अपराधोभवत्येवसाधकस्यपदेपदे कोपरःसहतेलो

९.

337

केकेवलंस्वामिनं ज्ञनः ८ अपराधसहस्राणि क्रियन्तेऽहर्निशं
मया क्षमस्व देवदेवेशि मातः सर्वं क्षमस्व मे ॥ इति साष्टांगप्र
णामेन घंटावादनपूर्वं श्रीदेवीस्तोत्रं पठेत् ॐ श्रीमच्छ्रीकोशहृ
दयं पंचसिंहासनात्मकं फलं कल्पलतानां च चारुरत्नस्फुरत्करे
वर्ण्यायतनानंदिवस्त्रान्वयकोशगं नित्यानंदपरंब्रह्मधामनौ
मि स्वात्मये २ गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीं देवीमंत्र
मयीं नौमि मातृकापीठरूपिणीं ३ प्रणमादिमहादेवीमातृकाप

रमेश्वरी कोलाहलहलोहलोलकलनाशमकारिणी ४ यदन्तरै
कमात्रेण संसिद्धैः स्पर्धते नरः रवितार्क्ष्येन्दुकंदर्पशंकरानलवि।
ष्णुभिः ५ यदन्तरशशिज्योत्स्नामंडितं भुवनत्रयं वंदे सर्वेश्वरीं दे
वीं मातृकां सिद्धमातृकां ६ यदन्तरमहासूत्रैप्रोतमेतज्जगत्त्रयं
ब्रह्मांडादिकटाहांतं तां वंदे सिद्धमातृकां ७ यदेकादशमाधारं वीजं
कोणत्रयोद्भवं ब्रह्मांडादिकटाहांतं जगदद्यापि दृश्यते ८ अकचा
दिटतोन्नद्धपयशाक्षरवर्गिणीं ज्येष्ठांगबाहुहृत्पृष्ठकटिपाददिनिवा।

338

२.

338

सिनी ९ तामीकारान्तरोद्धारां मारान्सारां परात्परां प्रणमामि महादेवीं परमानंदरूपिणीं १० अद्यापि यस्या जानंति न मनाग पि देवताः केयं कस्मात्क्व केनेति सरूपारूपभावनां ११ वंदेताम हमक्षय्यक्षकारान्तरूपिणीं देवीं कुलाकुलोल्लोलप्रोल्लसंती परां शिवां १२ वर्गानुक्रमयोगेन यस्यां मातृष्टकं स्थितं वंदेताम ष्टवर्गोत्थमहासिद्ध्यष्टकेश्वरीं १३ कामपूर्णजकाराख्यश्रीपीठां तर्निवासिनीं चतुराज्ञाकोशभूतां नौमि श्रीत्रिपुरामहं १४ पंचेहा

दशभिःश्लोकैःस्तवंनसर्वसिद्धिकृत् देव्यास्तवेऽस्मिन्पायाःस्त।
वनेनवतघतः ५ इतिस्तुत्वापुष्पांजलिमादाय देव्याश्चरणे।
योःक्षिपेत् ततःप्रार्थनीयमुद्रांबद्धाप्रार्थनास्तवंपठेत् किंकिं
दुःखंदनुजदलनिक्षीयतेतेनस्मृतायां काकाकीर्त्तिःकुलकमलि।
निर्व्याप्यतेनस्तुतायां काकासिद्धिःस्वरवरद्रतेप्राप्यतेनार्चितायां
कंकेयोगंनयिनचिद्रूतेचित्तमालंबितायां १ सर्गासंसर्गसारभस्फा
रिताघाघविभ्रमे चिन्हेद्रुमंडलोतष्येनमस्तेहरवल्लभे २ जगदा।

339

१८. ज्ञादनोद्योतयोगभोगवियोगिनि स्थितिभावस्थिते गौरि नमःस्था।
णुप्रियंविके ३ भावाभावद्वयप्रभावस्वधर्मोदयरूपिणि चैतन्यपंच
केदेवि नमस्तुभ्यं हरांगने ४ सृष्टिस्थित्युपसंहारप्रत्यहतपदोदये
चिद्धिंशांतमहासत्तामात्रेमात्रे नमोस्तुते ५ वह्न्यर्कशीतकिरणब्रह्म
चक्रांतरोदिते चतुष्पीठेश्वरि देवि नमस्त्रिपुरसुंदरि ६ चराचरमिदं
विश्वप्रकाशयसि पाश्यय मातृकारूपमास्थाय तस्यै मातर्नमोस्तुते ७
स्फुरत्ताभवभयं हंसि हृज्जिता सिद्धभंकरी स्तुतात्वं वांछितं वस्तु ददासि

339

करुणाकरे ८ भक्तस्यमेनित्यश्रद्धायुक्तस्यपरमेश्वरि वाग्भवादि
महासिद्धिंदेहित्रिपुरसुंदरी ९ परमानंदसंदोहप्रमोदभरनिर्भरे
दुःखत्रयपरिज्ञानवदनेपाहिमांशिवे १० शब्दब्रह्ममयेस्वच्छे देवि
त्रिपुरसुंदरि यथाशक्तिजपंपूजांगृहाणमदनुग्रहात् ॥ द्रव्य
हीनेक्रियाहीनेमंत्रहीनेवयद्भवेत् सर्वंतत्कृपयादेविक्षमस्वपर
मेश्वरि १२ यन्मयाक्रियतेकर्मजाग्रत्स्वप्नसुषुप्तिषु तत्सर्वंतावकीपूजाभूयाद्भूत्यैनमःशिवे १३ यन्मयोक्तमिहाज्ञानात्तन्महत्स्वल्प

340

९.

मेववा हंतसर्वजगद्धात्रिंतंतन्मयमंजलिः १४ हेताहेतमहामो
तशर्वरीतपणात्मः भास्वानिवजयत्येकोगणेशः शक्तिसंभृतः १५
प्रतिभासागरोल्लासोनिशाकरइवापरः मूर्तियुक्तः सजयतिवटु
कस्तांडवान्वितः १६ षट्त्रिंशत्तत्त्वभरितंतत्तेजःपालयत्वलं क्षेत्रे
शंतमहंनौमिवारुणाख्यंमहाबलं १७ चतुष्पीठनिवासिन्योयोगी
न्यर्योमहाबलाः चतुःषष्टिप्रकारास्तानिस्वंवेदेऽत्रसागताः १८ भे
दाभेदमहामोहविवर्तपरिमंडितं आप्नयंतीसमयाद्वात्रिंशाणा

नमाम्यहं ॥९॥ इति स्तुत्वा पुष्पांजलिं दत्वा प्रागुक्तस्तोत्रेणापि श्रीगु
रुं स्तुत्वा प्रणम्य सर्वशक्तिक्रमोद्भूति प्रभुस्तोऽहमिहात्मिका देव
स्य देवतां कां चित्तं वित्तस्त्वमयी श्रिये इत्युच्चरन् नमस्कारमुद्रां प्रद
र्श्य प्रदक्षिणानि कृत्वा ॐ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके
शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते इति श्लोकं सप्तधा पठित्वा
साष्टांगं पंचांगं वा पंचवारं प्रणम्य विततस्वस्तिकमष्टमुष्टियोन्मा
त्राभिः पंचमुद्राभिः प्रणमेत् पुनः साष्टांगं प्रणम्य ॐ क्षमो स्व ।

341

श्र.

341

लितपादानां भूमिरेवावलंबनं त्वयि जातपराधानां त्वमेव शरणं
शिवे । अपराधो भवत्येव सेवकस्य पदे पदे कोपरः सहते लोके
केवलं स्वामिनं विना । अपराधसहस्राणि क्रियंतेहर्निशं मया
समस्तमपि तं सर्वमिति मातः क्षमस्व मे ॥ इति वज्रपाशप्रणतिः
वेकं दत्वा अर्घोदकं पात्रांतरेण चादाय ॐ पें ह्रीं श्रीं इतः पूर्वं प्राण
बुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वा
वाकर्मणा पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्तन्मकुरु

देवसमर्चितमस्तु स्वाहा मामदीयं च सकलं श्रीमहात्रिपुरसुंद
र्यै सम्यगर्पये ॐ तत्सत् ऽनेनदेव्याश्चरणारविंदयोर्दत्तोदक
दानेनात्मानं समर्प्य एवं श्रीमूलसमयविद्यायाकेवलपुष्पेणमू
लदेवीं समर्प्यामं एवंकृतांजलिः ॐ यद्दत्तं भक्तिमात्रेणपुष्पं पत्रं फ
लं जलं निवेदितं च नैवेद्यं तद्गृहाणानुकंपया १ आवाहनं न जानामि
मि न जानामि विसर्जनं पूजाभागं न जानामि त्वं गतिः परमेश्वरि २ क
र्मणा मनसा वाचा त्वत्तोनान्यागतिर्मम अंतश्चारेण भूतानां रस्तात्वं।

342

१. परमेश्वरि ३ मातर्योनिसहस्रेषु येषु येषु व्रजाम्यहं तेषु तेषुऽच्यु
ताभक्तिरच्युतेऽस्तु सदा त्वयि ४ देवी दाता च भोक्ता च देवी सर्वमिदं
जगत् देवी जयति सर्वत्र या देवी सोऽहमेव हि ५ यदक्षरपरिभ्रष्टं।
मात्राहीनं च यद्भवेत् तत्तमर्हसि देवेशि कस्य न स्खलितं मनः ६
नमस्ते देवदेवेशि त्रिपुरे परमेश्वरि तव पादाम्बुजे नित्यं निश्चला
भक्तिरस्तु मे ७ इति समाप्य सर्वं योनिमुद्रया प्रणमेत् शंखमुद्रया
श्रीदेव्युपरि त्रिः परिभ्रामयित्वा प्राभवा साभवा कर्म यद्यदाचरितं

342

मया तत्सर्वं क्षपयादेवि शृङ्गारायतनं मम इति देव्या दत्तहस्ते
शंखजलं किंचिद्दत्त्वा शंखं स्वस्थाने संस्थाप्य तज्जलं किंचिद्वाम।
हस्ते निधाय मूलेन सप्तधाभिमंत्र्य स्वात्मानं मूलेन तेनाभ्युक्ष्य
अस्मानपि सामयिकान्प्रोक्ष्य पुष्पांजलिमादाय ॐ रश्मिरूपा महा
देव्या अग्रपूजितदेवताः श्रीमद्देव्यंगलीनास्ताः संतु सर्वे स्वभाववद्धाः
इति पुष्पांजलिं निक्षिप्य परिवारगणान्गणेशाद्यानंगदेवतासहि
तान्देव्या देहे विलीनान्विभाव्य कामकलारूपमात्मानं ध्यात्वा

343

१

९. देवाभ्रूषणमाञ्चधांतत्सर्वंनिजदेहेविचिंत्य देवीरूपमात्मानं ध्यायन् खेचरीमुद्रांबध्वा तद्बीजेनदेवींप्रणम्य मूलंभगवति श्रीमहात्रिपुरसुंदरीनमस्ते इतितालत्रयेणदेवींप्रचोद्यतेजो मयींविचिंत्य गच्छगच्छपरंस्थानंस्वस्थानंपरमेश्वरि यत्रब्रह्माद योदेवानविदुःपरमंपदे इतितेजोरूपांतांसंहारमुद्रयानिर्माल्य पुष्पेणतत्तेजःसमुद्धृत्य वामनासापुटेनाघ्रायपूरकयोगेनसह स्रदलकमलंप्रापय्य तत्रतांतेजोरूपांध्यात्वा सुषुम्णामार्गेण

343

२

ऐं हृदयाय नमः इति हृदयकमलमानीय तत्र यथोक्तरूपं ध्यायन् तिष्ठति हृदये स्थाने स्वस्थाने परमेश्वरि यत्र ब्रह्मादयः सर्वे स्वात्मनि हंति मे हृदि इति हृदयकमले संस्थाप्य तत्र यथोक्तसिंहासनमध्यगतश्रीचक्रमध्यगतां सपरिवारां परदेवतां संस्थाप्य ऐशान्यां जलेन त्रिकोणवृत्तचतुरस्रं मंडलं निर्माय तन्मध्ये शेषिकां त्वां निर्मील्यवासिनीं तन्मंत्रेण षडंगन्यासेन सकलीकृत्य मातंगीनव यावकार्द्रचरणां श्रोल्लासिकल्हारं शुकां वीणोल्लासिकरां समुन्नतकुचा

९. मुक्ताप्रवालावली लसद्गांगेयसितशंखकुंडलधरां बिंबाधरां सुस्मि-
तामाकर्णालकवेणिमञ्जनयनां ध्यायेच्छुकश्यामलां इति जग-
न्मोहिनीं निर्माल्यवासिनीं ध्यात्वा मूलदेव्या निर्माल्यं तदुच्छिष्ट-
भोजिनीं तां संपूज्य ऐं नमः उच्छिष्टचाण्डालिमातंगिनि सर्ववशंक-
रि स्वाहा शेषिका श्रीपादुकां पूजयामि नमः इति निर्माल्यपुष्पैः सं-
पूज्य तन्निर्माल्योदकादिभिः पाद्यादिदीपांतानुपचर्य नैवेद्यस्य श-
तांशं सहस्रांशं वा तच्चरणोदकेन निर्माल्यपुष्पांजलिमादाय ले

343

त्वचोष्यान्नपानादितांबूलं स्रग्विलेपनं निर्माल्यभोजनं तुभ्यं ददा
मि श्रीशिवाज्ञया इति दत्वा तालत्रयपूर्वं प्रणिपत्य तां विसर्जये
त् इति निर्माल्यवासिनीं संपूज्य तालत्रयपूर्वं देवनाथगुरोस्वामि
न्दैशिकस्वात्मनायक त्राहि त्राहि कृपासिंधो पूजां पूर्णतरां कुरु
इति श्रीगुरुं प्रार्थ्य श्रीपात्रमामस्तकमुद्धृत्य शिरस्याय श्रीगुरवे
समर्प्य तत्पात्रं दक्षकरे निधाय श्रीगुरुपादुकां विधाते श्रीमच्छ्री
प्रभुकानंदनाथश्रीपादुकां तर्पयामि नमः इति त्रिः संतर्प्य तत्पात्रं

९. स्वस्थाने संस्थाप्य तज्जलं किंचिन्मात्रान्तरे निधाय ऐं प्रथमकूटं आत्म
तत्त्वात्मने नमः क्लीं द्वितीयकूटं विद्यातत्त्वात्मने नमः सौः तृतीयकूटं
शिवतत्त्वात्मने नमः ऐं क्लीं सौः समस्तकूटं सर्वतत्त्वात्मने नमः इति
तज्जले विन्यस्य तज्जलं पुनः पात्रान्तरेणोद्धृत्य चुलकेनादाय त्रैलो
क्येशं निक्षिप्य ॐ प्रकृतिबुद्ध्यहंकारमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राण
वाक्पाणिपादपायूपस्थशब्दस्पर्शरसरूपगंधाकाशवाय्वग्निसलिल
पृथिव्यात्मकाश्चतुर्विंशतितत्त्वसहितं ग्रं रमादिग्रः ऐं प्रथम

हूंट्‌आत्मतत्वात्मकंस्थूलदेहंशोधयामिस्वाहा ॐमायाकला
विद्यारागकालनियतिपुरुषात्मकशुद्धाशुद्धसमस्ततत्वसहितं
कं इत्यादिमंतः ह्रीं द्वितीयहूंट्‌विद्यातत्वात्मकंसूक्ष्मदेहंशोध
यामिस्वाहा २ ॐशिवशक्तिसदाशिवेश्वरशुद्धविद्यात्मकपंचत
त्वसहितंयं इत्यादिलंतः सौंतृतीयहूंट्‌शिवतत्वात्मकंपरदेहं
शोधयामिस्वाहा ३ ॐशिवशक्तिसदाशिवेश्वरशुद्धविद्यामाया
कलारागकालानियतिपुरुषप्रकृतिबुद्ध्यहंकारमनःश्रोत्रत्वक्‌

त्वग्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगंधाका
शवाय्वग्निसलिलपृथ्व्यात्मकषड्भिश्चषड्विंशतत्त्वस
हितंग्रंग्रांइत्यादितेतःऐंक्लींसौःमूलंसर्वतत्त्वस्थूलसूक्ष्मपराख्य
देहत्रयाभिमानिनंजीवात्मानंशोधयामिस्वाहा इतिचुलकत्र
त्रयंस्वीकृत्य तत्मात्रेकमाध्यामादाय मूलंश्रीगुरुपादुकांवि
द्योवोऽस्मार्थे ॐप्रकाशाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचं धर्मा
धर्मकलास्नेहपूर्णवन्हौजुहोम्यहंस्वाहा इतितज्जलमश्नीयात्

ततःकराभ्यांमूर्धादिपादांतंषट्त्रिंशत्तत्वात्मकंतंभाव
यन्स्वदेहंस्पृशेत् ततःस्वसामयिकैःसहयथाप्राप्तंगुरू
पदिष्टविधिनापात्रवंदनंकुर्यात् तत्रादौगुरुपात्रमुद्धृत्य
श्रीगुरुपादुकांस्मरेत् यदिगुरुस्तत्रैवस्यात्तस्मैदद्यात्
यदिनस्यात्तज्ज्येष्ठशिष्यायदद्यात् तदभावेस्वशिरसि
स्थापयेत् ततःमूलाधारात्कुंडलिनीमुत्थाप्यस्वजि
ह्वाग्रांतमानीयस्वपात्रंत्रिविंदोपरिधृत्वापठेत् इज्ञायां

347

पा॰
वं॰

347

पात्रमानंदभरितंपरमेश्वरि गुरुणादत्तमभ्यर्च्यप्रणमे
शिरसानतेत्स्वीकृत्वा ॐश्रीपात्रवंदनेसामयिकैःसा
र्धंविदध्यात श्रीगुरुभ्यःपात्रेवंदयित्वागृहीत्वा दक्षकरे
णतत्त्वमुद्रयाक्षाघ वामकरेणत्रिखंडामुद्रयागृही
त्वा अर्घ्याय दक्षकरेणतत्त्वमुद्रयास्वाहिविंदुंगृहीत्वा
पात्रवंदनंकुर्यात ॐश्रीनाथादिगुरुत्रयंगणपतिंपीठ
त्रयंभैरवं सिद्धौघवटुकत्रयंपदयुग्मंदूतीक्रमेशांभवम्

४

वीराद्यष्टचतुष्कषष्टिनवकं वीरावलीपंचकं
श्रीमन्मालिनिमंत्रराजसहितं वंदे गुरोर्मंडलम्
संसिद्ध्यर्थनमत्सुरासुरमिलन्मौलिस्थितप्रोल्ल
सत् सद्रत्नप्रभवप्रकृष्टविभवप्रोद्यन्मयूखो
ज्वलम् श्रेयोविघ्नमहामयप्रशमने दिव्यंपदे
कौषधं भूयान्मे द्विरदाननांघ्रिकमलद्वंद्वं त

पा॰
वे॰
348

दिशामये २ आरक्ताभांत्रिनेत्रांमणिमकुटवतीर
त्नताटंकरम्यां हस्तांभोजैःसपाशांकुशमदनध
नुःसायकैर्विस्फुरंतीम् आपीनोत्तुंगवक्षोरुहकु
गविलसन्नारहारोज्ज्वलांगींध्यायामंभोरुहस्था
मरुणानिवसनामीश्वरीमीश्वराणाम् ३ आनंदसं
दोहसुंदरमकरमाल्यमौलौहठेणनिहितंमहिषा

स्तुरस्य पादांबुजं भवतु मे विजयाय मंजु मंजीरशिंजि
तमनोहरमंबिकायाः ५ श्रीमद्भैरवशेखरप्रविलस
त्पद्मास्तनाम्लाविते देव्यार्थीश्वरयोगिनीगणमहासि
द्धैः समाराधितम् आनंदार्णवकं महात्मकमिदं श्री
मत्त्रिखंडामृतं वंदे श्रीप्रथमं कराम्बुजगतं पात्रं विशु
द्धिप्रदम् ६ अंतर्दंते पात्रमन्नविन्नवामममाणशातक्रतपू
र्णो हृद्वामयूरस्य मध्यायदभिपर्यन्ति देवाः ७ दंता पात्रं मे

पा॰
वे॰

349

मृतमहंतापरमास्तत्म् पराहंतामयेवह्नौजुहोमि
शिवत्तृपिति इदंपवित्रममृतंपिवामिभवभेषजम्
पशुपाशसमुच्छेदकारणंभैरवोदितम् चित्तेस्वातंत्र्य
सारत्वात्तस्यानेदग्धनन्ततः तन्मयत्वाच्चभावानांभावा
श्रान्तर्हितारसेस्वस्वातंत्र्यविकासायस्वरसःस्वेनपी
यते तस्मादिमांस्वरात्रूपांपूर्णांहंतापिवाम्यहंस्वाहा ॐ
श्रांईंज्वलतिज्योतिर्ज्वलतिज्योतिर्ब्रह्माहमस्मियोऽहमस्मि
ब्रह्माहमस्मि

सोऽहमस्मि ब्रह्माहमस्मि अहमेव ब्रह्माहमस्मि अ
हमेव अहं मां जुहोमि स्वाहा अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं
एं ऐं ओं औं अं अः शरूपरसगंधाहंकारबुद्धिमनःश्रोत्रत्व
क् चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्प
र्शरूपरसगंधाकाशवाय्वग्निसलिलपृथिव्यात्मकाश्च
उचतुर्विंशतितत्वसहितं स्थूलदेहाभिमानिनं जी
वात्मानमात्मनात्मकं शोधयामि नमः स्वाहा

350

श्री॰

350

श्रीगुरुपादुकामुच्चार्यमूलमंत्रंचउच्चरेत् ततोगुरूञ्छि
ष्यकृत्वाज्ञुहोमीतिपृष्ट्वा तेपिजुहुष्वपरमास्तनमि
तिब्रूयुः मूलाधारात्कुंडलिनीमुत्थाप्यकुलकुं
डलिनीमुद्विजृंभयात् इतिप्रथमपात्रप्रशंसा
ॐ हैमसिंधुरसावहदयितपादंतंचपेयादिभिः
किंचिच्चंचलरक्तपंकजदृशासानंदमुद्वीक्षितम्
वामस्थाडविमुडमुडिशाकलेपाणौतिधायात्मके

वंदे पात्रमहं द्वितीयमथुनानन्दैकसंवर्धनम् ॥
मनोज्योतिर्जुषतामाज्यं विछिन्नं यज्ञं संविन्दधात्व
याखुष्टा उषसो निम्लोचस्तासंदधामि हविषा घृ
तेन स्वाहा इदंतापात्रसंभूतमहंतापरमामृतम्
पराहंतामयैवक्रौजुहोमि शिवरूपिणि इदं पवि
त्रममृतं पिबामि भवभेषजम् पशुपाशसमुच्छेद
कारणं भैरवोदितम् चितेस्वातंत्र्यसारत्वात्तस्मानंद

351

श्री:

चनन्वतः तन्मयत्वाच्चभावानांभावाच्चान्तर्हितारसे
ष्वस्वातेश्चविकासायस्वरसःस्वेनपीयते तस्मादिमां
स्वगात्रमांपूर्णाहंतांपिबाम्यहंस्वाहा ॐआर्द्रंज्वलति
ज्योतिर्ज्वलतिज्योतिर्ब्रह्माहमस्मियोहमस्मिब्रह्माह
मस्मिसोहमस्मिब्रह्माहमस्मिअहमस्मिब्रह्माहम
स्मिअहमेवाहंमांजुहोमिस्वाहा ॐब्रह्मश्रीशामहे
शाहृद्यपूतमस्तशर्वात्मभद्रासनाभद्राणुघ्यशांक

२

मैत्तवधनुष्पाशाङ्कुजे र्बिभ्रती यासौ श्रीत्रिपुरात्रि
धामनिलयाचिन्मयैकरूपापरा सा नः पातु महे
श्वरी भगवती श्रीराजराजेश्वरी चिद्रूपं कृतनाम
रूपविभवं द्वैतं रूप्यं रूप्यं तु ये रासीदस्तिभविष्यती
ति वचसां दूरेपि सन्नावपुः त्यक्तायुक्त विमुक्ति भुक्ति
कलने भक्तेषु सूक्तिप्रणं श्रीशंभोर्जयति स्वभाव भ
पुरं ततशक्तिरूपं महः २ श्रीदेवीहरिगाशिवाय

श्रीः

352

भजतां सर्वासु येरक्षिका ऽरण्ये सत्त्वभये रणे विहरणे
भूपालये भीषु च प्रस्थाने व्यसने मनोरथगतो ब्रह्मा
दिं वध्या सुभसानिध्यं कुरुतात् सदा सकलगा श्री रा
जराजेश्वरी पुण्यापुण्ये समिद्धयं सततसन्दीप्ते वि
दग्धो त्वयि स्फूर्जत्सर्वकचर्ब्ब बीजनिवहं ज्ञ्वाल
भावेह विः शांतांतः करणे स्रुचा च निखिलां पूर्णाहु
विर्वासनां तां स्वात्मेशि र्यजेन्निशं परशिवां श्रीराजरा

जेश्वरि षोडशाम्नायमयीत्वमादिसमया त्वं पंचदशन्ते
श्वरी लक्ष्मी कामेश्वर्यादि वंद्यचरणा त्वं चात्रपूर्णा वि
कातं षट्दर्शनपूजिते शहृदये प्राणनुत्तरात्मासित
जीवन्मोक्षणभोगदा प्रभव मे श्री राजराजेश्वरि कं
खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं
भं मं मायाकलाविद्यारागकालनियतिपुरुषात्मकं
शुद्धाशुद्धसप्ततत्त्वसहितं विद्यातत्त्वात्मकं सूक्ष्मदेहं

353

श्रीः

शोधयामि नमः स्वाहा २ ॐ सर्वाम्नायकलाकला
पकलितं कौतूहलोद्योतितं चंद्रोपेंद्रमहेंद्रशंभुव
हणब्रह्मादिभिः सेवितम् ध्यातं देवगणैः परं मुनि
गणैर्मोक्षार्थिभिः सर्वदा वंदे पात्रमहंत्ततीयमधुना
स्वात्मावबोधप्रदम् ॐ आप्यायय स्वमते सोम वृष्णि
म् भावा वाजस्य संगथे ॐ इदं ता पात्रं संभृतमहंता
परमामृतम् पराहंतामये वह्नौ जुहोमि शिवरूपि

णि इदं पवित्रममृतं पिबामि भवभेषजम् पशुपा
शसमुच्छेदकारणं भैरवोदितम् चित्तैस्त्वां तत्रमार
तानन्दघनतत्वतः तन्मयत्वात्स्वभावानांभावा
त्तातर्हितारमे स्वस्वातन्त्र्यविकासायस्वरसः स्वेनपी
यते तस्मादिमांसुरां तूर्णं पूर्णाहं तां पिबाम्यहम् स्वा
हा ॐ आर्द्रंज्वलतिज्योतिर्ज्योतिर्ज्वलति ब्रह्माहमस्मि
योहमस्मि ब्रह्माहमस्मि सोहमस्मि ब्रह्माहमस्मि अह

354

श्री:

354

मस्मि ब्रह्माहमस्मि अहमेवाहं मांजुहोमि स्वाहा ॐ त्रि
बीजविषया त्रिधा नियमिता त्रिवेदकृता त्रिलोकजन
नी त्रिभिस्त्रिदशनाथगेयापदैः त्रिधाममहिमस्थली त्रि
त्रिसमयावभेदापरा त्रिनेत्रदयिता हिता त्रिपुरसुंदरी पा
तु नः योराजीवहृसतत्त्वबीजविनिधी वियाधिवंद्येपि
ते राजेते चरणौ सदाशिवमयेपीठे सहस्रारविव भंगोति
दृसमवीरुधा विलसितौ पीयूषपाथोनिधौ ताभ्यां पिंडप

श्रुद्धयीमुपह्वरे श्रीराजराजेश्वरि हेतुर्लोकविधातस
र्जनविधौ भातीवयायष्टिका पूर्णाभीष्टनिदानकल्पल
तिका भूषाप्रसूनोज्वला दत्तानन्तबहुजमंजरीबऽश्रि
वं तिंबप्रबंधार्गला भक्तत्राणनिरर्गलंचविभवं श्रीरा
जराजेश्वरि ॐस्मसितहसितवक्त्रा सोमसूर्याग्निनेत्रा
तपनशतपिशंगा चंद्रलेखावतंसा सरसकलशचं
टाशक्तिचापेषुहस्ता जयतिहरिरथस्था शारदा मोक्तदा

355

श्रीः

365
३२५

श्री परात्परसमाज्ञत प्रसरसारसंबोधनः स्वभावगु
णगर्भिणी कृतकवर्णमंत्रोज्झिता दिनेशशशिपावक
त्रिशिरविमूलमूलाख्यगा परास्फुरत्नभारतीमनसिसर्व
दायोगिनाम् सिद्धिं देहि परां समृद्धिमचलां बुद्धिं वदचो
परां शुद्धिं मानसिकीं विधेहि कृपया ऋद्धिं च सार्वार्थिकी
म् छिंद्धि पापदमाशु भिंद्धि विषयोत्पन्नां व्यथां साधुसंपि
द्धिबाधिमहांध्यजन्ममृतिजं श्रीराजराजेश्वरि त्र्यकृण

किरणजालैरंजिताशावकाशा विधृतजपवटीकापु
स्तकाभीतिहस्ता इतरकरवराढ्याफुल्लकल्हारसंस्था
निवसतुहृदिबालानित्यकल्याणशीला दिगंबरां
कितनुंमिहिराग्निचंद्रनेत्रांसुधांशुमुकुटांहिमस
न्निभाभाम् सिंहासनांपरशुवज्रधरांत्रिनेत्रांब्रह्मेंद्र
विष्णुनमितांत्रिपुरांभजामः उद्यत्प्रेहेमरुचिरांरवि
चंद्रवह्निनेत्रांधनुःशरयुतांकुशपाशान् रम्ये

356

श्री:

356

भजे श्वदधन्तीं शिववशाक्तिरूपां कामेश्वरीं हृदि भजामि
धृतेंदुलेखाम् त्रैलोक्यपूजितपदांबुरुहद्वयीं तां कु
लांबुभत्स्तहृशारूपधरां त्रिनेत्राम् मूलाम्बुजांविमह्
तीं स्वभुजे वहंतीं पपां मां स्मरेशवशरीरकृतां मनस्था
सितां नदी समायुक्ते वेतसी वेदिमध्यगाम् तंत्रीवाद्यर
ते निसंमेव राजं नमाम्यहम् उद्यद्दिनेशद्युतिभिंडकि
रीटां तंगजाननां नयनत्रययुक्ताम् स्मेरप्रवीवरदाभय

पाशाभीतिकरां प्रभजे भुवनेशीम् करकलितकपा
लः कुंडली दंडपाणिस्तरुणतिमिरनीलो व्यालयज्ञो
पवीती क्रमसमयसपर्याविघ्नविच्छेदहेतुर्जयति
वटुकनाथः सिद्धिदः साधकानाम् पीयूषांशुशिरो
मणिः करतले पीयूषकुंभं वहन् पीयूषद्युतिसंपुटांत
रगतः पीयूषधाराधरः सोपीयूषमयूखसुंदरवपुः
पीयूषलक्ष्मीसखः पीयूषद्रववर्षिणो हरहरः प्रीणा

357

श्रीः

२८

357

तमस्तेजयः यंरंलंवंशंषंसंहंलंक्षः शिवशक्तिसदा
शिवेश्वरशुद्धविद्यात्मकपंच तत्त्वसहितेकारणदे
हं शोधयामि नमः स्वाहा ॐ स्वात्ममूलत्रिकोणेष्वसू
र्यकोटिसमप्रभे ॐ डल्याकृतिविद्रूपेऽनेकव्यसमंत्र
कम् १ ॐ मयेमीनरमावहेहरिहरब्रह्मादिभिः से
विते मुद्रामेष्युनधर्मकर्मनिरंतंतारामलतिकाश्र
यम् आचार्याष्टकसिद्धभैरवकलाम्पासेनसंशोधिते

पायात्पंचमकारतत्वसहितेपात्रेचतुर्थेनमः सद्यः
छिन्नशिरःकृपाणमभयंहस्तेवरंबिभ्रती घोरास्यां
शिरसांस्रजासुरुचिरामुन्मुक्तकेशावलीम् सृक्कासृ
क्प्रवहांश्मशाननिलयांश्रुत्योःशवालंकृतिंश्यामां
गीकृतमेखलांशवकरैः देवीभजेकालिकाम् अंभो
दश्यामलांगीमतिविकटदंती लोलजिह्वांजटालांमुं
डंवामेदधानां करकमलतलेदक्षिणेचंद्रहासम ह

358

श्रीः

क्षिद्वद्वांस्कधाराधरमुखकमलां प्रेतदोर्वल्लिकांचीमा
ह्रीकोन्मत्तनेत्रां शवहृदयगतां नौमि कालीं सकालाम्
न्तमुंडकरवालिकाभयवरान्करैर्मालिकालसत्तु
ग्ममालिकावरसमुल्लसद्गालिका प्रभाप्रजितभा
लिकानिखिलकृच्छ्रविस्फालिकासदाभवतुकालिका
स्तुतिरियंमुदेकालिका देवीपन्नगभूषणां हिमरुचिं
पीतांशुशांखप्रभां मुक्तारत्नपरीतकंठवलयांरक्तांबरं

५ 358

श्री:
१-

स्मोषयंती जयतिजगतिदेवीश्रीसुंदरीक्रीडयंती
वीजैः सप्तभिरुज्वलाकृतिरसौयासप्तसप्तिद्युतिः
सप्तर्षिप्रणतांघ्रिपंकजयुगायासप्तलोकार्तिहृत
कश्मीरप्रवरेशमध्यनगरप्रद्युम्नपीठस्थिता देवी
सप्तकसंयुताभगवतीश्रीशारिकापातुनः स्वेष्टोसं
स्थापनायत्नपद्दरणविधौमोहनेतुयद्देवा सर्वेषा
मर्गलानांनिजमहिमवशादक्रमेणैवयालम् निसं

बिभ्रतीम् मूलाज्ञासिगदाधरां सुरगणैर्वैकुंठमु

ख्यैःस्तुतां नित्यलोकवैघेकरलणपरांतांशंत्रिनेत्रां

भजे अतिविमलसुवर्णांशोप्यपात्रस्थमन्नंसुललि

तदधिविंडपाणिनादक्षिणेन कलशममृतपूर्णं

वामहस्तेदधाना तरुणतरणिभासामन्नपूर्णांन

मामि अजलरूपंतती चक्रमध्ये स्फुरंती मधुरमधु

पिबंतीकंठकान्भक्षयंती दुरितमपहरंती साधका

359

क्रीडाप्रसक्ता रचयति सकलं स्वात्मशक्त्या प्रपंचं सान
न्दात्त्राणाय भूयादभिमतफलदा भद्रकाली च काली
ब्रह्माद्याश्च पिपंच मुंड विषयाद्दष्टेन शक्ताइ वा ध
ल्ला देव वहं तिपद्ह्र हमहाकालाप्त सिंहासनम् प
ङ्क्तोपि विहाय कार्श्यमखिलं यादात्म मेसद्भुतं या
नादेव दधात्तस्मापरिमितं निर्मबलं कालिका पं रं
लं वं शं षं सं हं लं क्षः शिवशक्ति सदाशिवेश्वरशुद्धवि

श्रीः

ज्ञात्मकपंचतत्वसहितंकारणदेहं शिवतत्वात्मकं
शोधयामिनमःस्वाहा ४ ॐआधारेभुजगाधिरा
जवलयेपात्रंमहीमंडले द्वीपसप्तसमुद्रवारिपि
शितेचाष्टोच्चदिग्दंतिनः सोहंभैरवमर्चयस्मृतिदिनेता
रागैरवन्ते रादित्यप्रमुखैःस्वराःस्वरगणैराज्ञाकरैः
किंकरैः धर्माधर्मकलाहृदङ्गितरसंवेदेषुखैःसंस्तुत
हृतीयागकलाष्टसम्भ्रतरसंगुरुरहस्याद्भुते ज्ञानेदोद्भवनाद

बिंदुकलयायोगपुल्लसन्नेरवैः पीतं ब्रह्मरसंमहो
दयकरं पात्रं भजे पंचमम् अरुणांकरुणातरंगि
ताक्षीं धृतपाशांकुशचापबाणान् अणिमादिभि
रावृतां मयूखैरहमित्येव विभावयेभवानीम् कर्पू
रताटंकमुखारविंदां माणिक्यमंजीरपदारविंदाम्
हालामदाघूर्णितलोचनांतां बालां भजे नीलतमाल
नीलाम् अनंतमणिमंडपे रचितयोगपीठे परामनेगा

361

श्रीः

361

ॐ स्तुमाश्रितंतारविदशायुताभप्रभाम् पाशांकुशधनुर्ले
ताकुसुमपाशहस्तांभुजांमहात्रिपुरभैरवींशिवशवो
पविष्टांभजे कामेश्वराकारमहार्घपीठे निषेदुषींशी
घुरसाकलालीम् श्यामांमहाकालपरांत्रिकूटांचतु
र्भुजांचेतसिचिंतयामि परायाचिद्रूपास्फुरितविभवा
तःस्तनवती वकुस्पामित्येकानदनुतनुते तत्समभि
दम् विचित्रंस्तुडाक्षप्रस्टतिमतिविश्रामममभिदा महा

विद्यामायाविशदस्वविदेयरूढपदे प्रसूतेहूतेन
प्रतिनियतरूपेणचपरा निरूप्यविरूपाजगदगम
येतिघ्यरिचयम् प्रपंचेयास्वच्छासुङ्करिहगरणं
तंफगितिसा जगन्मातापातात्जगदगनिपाता
ङ्गवती यांतर्हेश्पाबहिरपिसदानिर्निमेषस्वद
ष्ट्रिश्रितंचितंग्रष्ठयतिहतग्रंथिहृत्तिप्रहृतेः ता
रंतारंकलयतियथाभ्यस्तयातारकंते संसाराब्धेर्भ

362

श्रीः

१३ 36

वत्तभवतांभूतयेशांभवीनः यामाराख्यातनुतम
तिमान्कश्यपोवश्यभूति भूमेर्देशांप्रतिनियमि
वोत्तुंगतीर्थैकरंगम् तेगत् तेगाद्धिमसशिखरि
ख्यातसम्यक् समंतं काश्मीरीमांसुवियत्सुपूर्वे
कवासानुभूत्या बीजैर्ज्ञादशाभिरतलांपंचमिश्रेसलेनो
ति तज्ज्ञानांयाहृदयविशदाकाशकोशेसमन्तात् काचि
तहर्षप्रथमलहरी कौमुदीमेव्यनेसा लोपामुद्राकथमिह

परैर्मुद्रितस्वांतमर्त्यैः कंखंगंघंङं. चंछंजंझंञंटंठं
डंढंणं तंथंदंधंनं पंफंबंभंमं मायाकलाविद्या
गकालनियति पुरुषात्मकषड्त्रिंशत्तत्व
सहितं विद्यातत्वात्मकं सूक्ष्मदेहं शोधयामि स्वाहा
अस्मिन्नेवावसरे चेत् विश्रामो भवेत् तदान्यान्य
पिधानानि आनंदलहरीश्लोकानि शिवःशक्त्यायु
क्त इत्यारभ्य तवभवनकोणपरिणताइत्यंतं पठेत्

363

श्रीः

363

लक्ष्मीसूक्तं च पठेत् ततः षट्सु पात्रं जपयेत् सततं ज्ञानम
लभद्रपीठपरमानंदोदयादायकं रम्यं राज्यकरं सदा
सुखकरं सायुज्यसाम्राज्यदम् नानाव्याधिभवांधका
रप्रशमनं जन्मांतरध्वंसनं श्रीमद्भैरवभैरवीप्रियतरं
पात्रं च षट्सु नुमः कृत्वाधारधरां चमत्कृतिरसप्रोल्लास
णलालिता मौनेमीनमतःस्वभावकुसुमैः स्वामोदसंदो
हिभिः आनंदामृतनिर्भरस्वहृदयानर्घ्यपात्रक्रमात्

त्वांदेव्यासहदेहदेवहृदयेसंतंयेहर्निशम् नाना
स्वादरसामिमांत्रिजगतीहन्तचक्रंयेचार्पितामूर्धा
धस्तविवेकगौरवभरात् निर्व्याजनिःछादितम् य
त्सवित्परमामृतंस्मृतिजराजन्मापहंजृंभते तेनत्वां
हविषापरेणपरमेसंतर्पयेहर्निशम् यादेवीशिव
केशवादिजननीयावैजगद्रूपिणी याब्रह्मादिपि
पीलिकादिजनतानंदैकसंधायिनी यापंचप्रणमन्त्र

364

श्रीः

रेश्वरशिरः पीठेषु संस्था सदा सापायात्परदेवता भग
वती श्रीराजराजेश्वरी अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं
अं अः पुरुषप्रकृत्यहंकारबुद्धिमनः श्रोत्रत्वक्चक्षुर्जि
ह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगंधा
काशवाय्वग्निसलिलपृथिव्यात्मकाशुद्धचतुर्विंशतित
त्त्वसहितमात्मतत्त्वात्मकं स्थूलदेहं शोधयामि नमः स्वा
हा ८ जाग्रत्स्वप्नसुषुप्तितुर्यपरतत्त्वेन तत्वसाक्षिपदं वि

364

१५

ग्रुतभास्करचंद्रजिल्लुयन्नुषांज्योतिष्कलाव्यापितम्
येडापिंगलमध्यगाविवलयातस्याःप्रबोधोदितं पात्रं
समममपूरणेनततक्षणानंदप्रदंपातुमाम् त्वंद्रंश्रीगु
रुपादुकांचतिलकंकंठेपिमारस्वतं शंभोर्वाग्बलबु
द्धिशोर्यहरणंदेहस्थितेःकारणम् वांछासिद्धिकरं
मनःस्थितिकरंवश्यंजगद्योषितां पात्रंवाहममम्प्रसि
द्धिकरणंश्रोद्भवतांपभजे सर्वानंदकरंसदाशिवकरं

श्रीः

सर्वार्थसंपत्प्रदं सायुज्यार्थकरं समस्तसुखदं वाञ्छा
नविध्वंसनम् आयुष्कान्तियशोविवर्द्धनकरं संसार
मोहच्छिदं पात्रं लक्ष्यगुणात्मकं च नवमं श्रीवृक्षपत्रं
भजे ब्रह्मविष्णुमहेशानां देवानां च विशेषतः दुर्लभं
पावनं पात्रं दशमं प्रणमाम्यहम् पापघ्नं शान्तिशुभदं
दिव्यमाङ्गल्यावहम् पात्रमेकादशं वन्दे गृहमेवास्व
र्गागतम् पात्रं कृत्वा करे मंत्री सर्वकर्मलभेत्स्वि

१९

365

इहलोके प्रियं भुक्त्वा देहान्ते भैरवो भवेत् करे पात्रं
सुविस्तीर्णमानंदो हृदयांबुजे भक्तिर्गुरुपदांभोजे
स्मरणं किमतः परम् एकेन शुष्ककवट्केन चटपि
वामि वापीं पिबामि सरसालवणार्द्रकेण आस्वाद
मांसमत्सिरोहितमुंडखंडं गंगां पिबामि यमुनां सह
सागरेण करे मालां सुविशालां वामे रामा सुकोमला
हृदये त्रिपुराबालाप्यागशालाटहेटहे पात्रं भैरव

366

श्रीः

366

१२

पात्रंगोत्रंश्रीनाथपादुकागोत्रम् शास्त्रंसंवित्शास्त्र
ज्ञानंतत्त्वावबोधकंज्ञानम् अलिपिशितपुरंश्रीभोग
पूजापरोहं बहुविधकुलमार्गारंभसंभावितोहम्
पशुजनविमुखोहंभैरवीमाश्रितोहं गुरुचरणर
तोहंभैरवोहंशिवोहम् वामेरामारमणकुशलाद
क्षिणेचोलिपात्रं मध्येमुद्राचणकवटकाःसूकरस्या
सशुद्धिः स्कंधेवीणासमरसकवितासत्कथामद्यपूर्णा

कौलो मार्गः परमगहनो योगिनामप्यगम्यः वामे चंद्र
मुखी मुखि च मदिरापात्रं करांभोरुहे मूर्ध्नि श्रीगुरु
चिंतने भगवती ध्यानास्पदे मानसम् जिह्वायां ज
पसाधने परिणतिः कौलक्रमाभ्यासने ये संतोनि
यंतं पिवंति सरसं ते भुक्तिमुक्ती गताः पीत्वा पीत्वा
पुनः पीत्वा यावत्पतति भूतले उत्थाय च पुनः पीत्वा
पुनर्जन्म न विद्यते यावन्न चलते दृष्टिर्यावन्न चलते

367

श्रीः

मनः तावत्मानेप्रकर्तव्यं पञ्चपानमनः परम् ध
र्माधर्महविर्दीप्ते स्वात्माग्नौ मनसास्रुचा सुषुम्ना
वर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम् स्वाहा प्रकाशा
काशहस्ताभ्यामवलंब्योन्मनीस्रुचम् धर्माधर्मक
लास्नेहपूर्णं वह्नौ जुहोम्यहं स्वाहा इदंतापात्रसंभू
तमहंतापरमामृतम् पात्रे हंतामयेवह्नौ जुहोमि शि
वरूपिणि इदंपवित्रममृतं पिबामि भवभेषजम् ॥

पशुपाशसमुच्छेदकारणं भैरवोदितम् विज्ञेस्वातंत्र्य
सारतातस्यानंदमयतततः तन्मयत्वाच्च भावानां भाव
स्यांतर्हितारसे स्वस्वातंत्र्यविकासायस्वरसः स्वेनपी
यते तस्मादिमां स्वागात्रूपां पूर्णाहंतां पिवाम्यहम्
स्वाहा ॐ आं ईं ज्वलति ज्योतिर्ज्योतिर्ज्वलति ब्रह्माह
मस्मि योहमस्मि ब्रह्माहमस्मि सोहमस्मि ब्रह्माह
मस्मि अहमस्मि ब्रह्माहमस्मि अहमेवाहं मां जुहो

368

श्रीः

मि स्वाहा अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः कं खं
गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं
लं वं शं षं सं हं ळं क्षं: शिवशक्तिसदाशिवेश्वरशुद्धवि
द्यामायाकलाविद्यारागकालनियतिपुरुषप्रकृत्य
हंकारबुद्धिमनःश्रोत्रत्वक्चक्षुःजिह्वाघ्राणवाक्पाणि
पादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवायुवह्निस
लिलपृथिव्यात्मकषट्त्रिंशत्तत्त्वसहितं ।।:।।

२५ 368

स्थूलसूक्ष्मपरारव्यदेहरूपाभिमानिनंजीवात्मानं
शोधयामिनमःस्वाहा॥ गुरुपादुकामुच्चार्य मूलम
न्त्रेच उच्चरेत् विश्वोत्तीर्णं विश्वमयंनाथमनंतं सवि
त्तात्मानमखंडंनिखिलालयम् वेद्यंवेदैःकोविदवर्यैः
स्वरवेद्यं कौलाधीशंसाहिबमीडेगुरुमीशम् नित्यं
सत्यंनिर्गुणमेकंगुणपूर्णं ह्यस्पस्वल्पकृत्यविधिज्ञैः
कृतकृत्यम् चिद्धिभ्रांतशांतविकल्पंभगवंतं कौ

श्री:

लाधीशं साहित्वमीडे गुरुमीशाम् अंतर्निरंतरनिरि
ध्नमेधमाने मायांधकारपरिपंथिनि संविदग्नौ क
स्मिंचिदद्भुतमरीचिविकासभूमौ विश्वं जुहोमि व
सुधादिशिवावसानम् स्वाहा सकलतत्वं शोधया
मि स्वाहा इति पूर्णपात्रं कृत्वा ततः पात्रं प्रक्षाल्य स्व
वामे त्रिकोणं भूमौ कृत्वा यथाशक्ति दक्षिणादिना पू
र्ण्यगुरवे समर्प्य ॐ यं यं स्पर्शामि पादेन यं यं पश्यामि

२०

369

वन्तया सपवदासतांयान्नयदिशक्रमसमोभवेत्
इतिवामकनिष्ठयातिलकंकृत्वा ॐनमोनमो
याकिनीभ्योहाकिनीभ्योनमोनमः नमोनमोड
किनीभ्यः काकिनीभ्योनमोनमः इत्यनेनमंत्रेण
पात्रंप्रगोप्य तांबूलादिकंगुर्विलिप्त्वादेवीरूपस्था
त्मानंविभाव्य सुखंविहरेदितिशिवम् इतिपात्र
वंदनम् ततःपूर्वस्थापितवलिपात्रस्यमन्त्रादिकमेक

370

स्मिन्पात्रे कृत्वा तदुद्धृत्यायसोदकपात्रहस्तो वहिर्ग
त्वा जलेन शुचौ देशे चतुरस्रवृत्तत्रिकोणात्मकं मंड
लं कृत्वा तत्र गं[illegible]त्रिशूलडमरुपात्रहस्तं त्रिलोचनं
कृष्णाभं भैरवं देवं सर्वविघ्नविनाशनं इति उच्छिष्ट
भैरवं ध्यात्वा गंधादिना संपूज्य ॐ ऐं ह्रीं श्रीं उच्छिष्ट
भैरव एह्येहि वलिं गृह्ण २ ॐ फट् स्वाहा इति पात्र
स्थं वलिं दत्वा तत्र मंडले विसृज्य तत्पात्रे हस्तौ पा

दोप्रक्षाल्याचम्य तत्पात्रं जलेनापूर्य पूजागृहद्वारं ग
त्वा उदयोस्त्विति ब्रुवन्नेतः प्रविश्य स्वासने समुपवि
श्य तत्पात्रस्य जले विशेषार्घ्य जलविंदुं दत्वा तेनज
लेन स्वात्मानमभिषिंचन् ॐ अधमत्रीणि पात्राणि पं
च पात्राणि मध्यमम् उत्तमं सप्त पात्राणि पात्रभेदं त्रि
धा स्थितम् उत्तमं रुद्रपात्राणि पात्रभेदं त्रिधा स्थितं
अधमं सप्त पात्राणि रुद्रपात्राणि मध्यमम् सप्तादश

371

१

मुत्तमं तु पात्रभेदं त्रिधा स्थितम् अधमं रुद्रपात्राणि स
प्तादशं तु मध्यमम् षड्विंशदुत्तमं प्रोक्तं पात्रभेदं त्रिधा
स्थितम् सप्तादशमधमं तु षट्त्रिंशन्मध्यमं स्मृतम्
उत्तमं चतुराशीतिः पात्रभेदं त्रिधा स्थितम् साधकस्य म
थि पुत्राचार्याणां कथितं क्रमात् सप्तरुद्र सप्तादश षट्त्रिं
शत् चतुराशीतिकम् पानं तु त्रिविधं प्रोक्तं दिव्यवीरपशु
क्रमैः दिव्यं देवाग्रतः पानं वीरं वीरासने कृतम् पशुभि

श्रमसंमपीत्वापशुपानंनिगद्यते दिव्यंतमोल्लदंप्रोक्तं
वीरंतभोगमोल्लदम् पशुभिश्चसमंप्रोक्तंकलहोद्दे
गकारकम् समयंसंप्रदायंतुपादुकापद्धतिक्रम
म् संपाद्यविधिवत्वीरोपीत्वादिव्यमिमंविदुः पूर्वो
क्तंसंप्रदायंचसंपाद्यपरमेश्वरि वीरैःसहकृतंपानं
वीरपानंनिगद्यते अयद्वाभैरवंयागमकृत्वामंत्रत
र्पणम् पशुपानविधौपीत्वावीरोपिनरकंव्रजेत् गुरुत्वं

372

पू॰

372

पूज्यविधिवन्मंत्रपूजाविधिंचयः साधकःसतुविज्ञेयः
सप्तपात्राणितस्यैवे समयीराजपुत्राणांविधिवत्परि
कीर्त्तितः रुद्रपात्राणितस्यैवकर्त्तव्यानिमहेश्वरि पु
त्रकःपुत्रकाधारःपुत्रवत्पाल्यतेपियः पौत्रिकीभा
वमापन्नस्तस्यसप्तादशानितु आचार्यःशिष्यकर्त्ता
योमंत्रतंत्रविधिज्ञभाक् षट्त्रिंशत्पात्रभावज्ञःसप
वतत्रुलेश्वरि पूर्णाभिषेकसंयुक्तोविधिदीक्षायुतो

बुधः चतुराशीतिपात्राणांकर्त्तानान्यःऊलेश्वरि प
वंपात्रविधिंज्ञात्वाकृत्वाचविधिवन्नरः इहलोकेप
रत्रापिशिवःसात्तान्नसंशयः ॐनंदंतुप्रेतकूष्मां
डानंदंतुहृषिकानराः साधकानांशिवःसंतुआम्नायप
रिपालिनां १ जयंतुमातरःसर्वाःजयंतुयोगिनीगणाः
जयंतुसिद्धडाकिन्योजयंतुगुरुपंक्तयः २ नंदंतुअणिमासि
द्धानंदंतुभैरवादयः नंदंतुदेवताःसर्वाःसिद्धविद्याधरादयः ३

373

पू:

373

ये चाम्नायविभुञ्चाश्च मंत्रिणः सुहृद्बन्धवः सर्वे दानंदद्यदयाःनं
दंतु मम भक्तितः ४ नक्षत्राणि ग्रहा योगाः करणानि तथापरे
सर्वे ते सुखिनो यांतु मासाः संवत्सरास्तथा ५ तृप्यंतु पितरः स
र्वे ऋतवो वत्सरादयः भूचराः खेचराश्चैव तृप्यंतु मम भक्तितः
६ अंतरिक्षचरा ये च ये चान्ये देवयोनयः सर्वे ते सुखिनो यांतु सर्वा
न्यप्यपत्तिणः ७ पशवस्तरवश्चैव पर्वताः कंदरा गुहाः ऋषयो ब्रा
ह्मणाः सर्वे शांतिं कुर्वंतु मे सदा ८ तीर्थानि पशवो गावो ये चान्ये ऋण्वभू

सर्वास्तत्रिशितैःस्तुताः १३ शत्रवोनाशमायांतुममनिंदाकराश्चये
द्वेष्टारःसाधकानांचविनश्यंतुशिवाज्ञया १४ येनिंदकास्तेप्रलयं
प्रयांतुयेसाधकास्तेप्रभवंतुसिद्धाः सर्वत्रदेवीकरुणावलोकात्पुर :
परेशीममसन्निधत्तां इतिशांतिस्तोत्रं अथान्यप्रकारेणशांतिस्तोत्रं
श्रीभैरवउवाच ॐ देविवक्ष्यामिस्ज्ञांतेशांतिस्तोत्रमनुत्तमं वीरायेन
परानंदंपदंप्राशंपतिनिस्पृहाः १ योगिनीचक्रमध्यस्थंमातृमंडलवे
ष्टितं नमामिशिरसानाथंभैरवंभैरवीप्रियं २ अनादिघोरसंसारव्या

पिंथैकहेतवे नमःश्रीनाथवैद्यायकुलौषधप्रदायिने ३ आप
दोडुरितंरोगाःसमयाचारलंघनात् येसर्वेऽप्यपोहंतु दिव्यचक्रस्य
मेलनात् ४ आयुरारोग्यमैश्वर्यंकीर्तिलाभःसुविजयः कांतिर्मनोर
थश्चास्तुपांतुसर्वाश्चदेवताः ५ संपूजकानांप्रतिपालकानांयतींद्र।
योगींद्रतपोधनानां देशस्यराष्ट्रस्यकुलस्यराज्ञःकरोतुशांतिंभगवान्
कुलेशः ६ नंदंतुसाधककुलान्वयदर्शकायेसच्छाघनाख्यचतुहस्त
महान्वयाये नंदंतुसर्वकुलकौलरताःपरेयेप्यन्येविशेषपदभेदक

ए० शांभवाये ७ नंदंतुसिद्धगुरवःस्वगुरुक्रमौघाश्चेष्टानुगाःसमयि
नोवटुकाःकुमार्यः षट्योगिनीप्रवरवीरकुलप्रसूतानंदंतुभूमि
पतयोद्विजसाधुलोकाः ८ नंदंतुनीतिनिपुणानिरवद्यनिष्ठानिर्मि
त्सरानिरुपमानिरुपद्रवाश्च निमानिरंजनरतागुरवोनिरीहाःशा
न्ताश्चयांतमनसोहतशोकशंकाः ९ नंदंतुयोगनिरताःकुलयोग
युक्ताआचार्यसामयिकसाधकपुत्रकाश्च गावोद्विजाश्चव्रतयोयत
यःकुमार्योधर्मेभवंतुनिरताःगुरुभक्तियुक्ताः १० नंदंतुसाधककु

लाग्रणिमाद्यनिष्ठाशापःपंतत्वमयहिवियोगिनीनां साशांभवी
स्फुरत्वकापिममाध्यवस्थायस्यांगुरोश्चरणपंकजमेवलभ्यं ॥ याश्च
क्राक्रमभूमिकावसतयोनाडीश्रयासंस्थिता याःकायडुमरोमकूपनि
लयायासंस्थितायातश्च ऊर्ध्वामोर्मिमरुत्तंरगानिलयानिष्पासवासा
श्रयास्तादेव्योरिपुभक्षभक्षणपरास्वंपांतुकौलार्चिताः ॥१२॥ यादिव्या
क्रमपालिकाःक्षितिगता यादेवतास्तोयगायानित्यंप्रथिताश्चभाःशि
खिगतायामातरिश्वाश्रयाः याव्योमामृतमंडलामृतमयायाःसर्वगाः

376

ए.

सर्वे दास्ताः सर्वाः जलमार्गपालनपराः शांतिं प्रयच्छंतु मे १३ ऊर्ध्वं ब्र
ह्मांडतो वा दिवि गगनतले भूतले निष्कले वा पाताले वा नले वा पव
नसलिलयोर्यत्र कुत्र स्थिता वा क्षेत्रे पीठोपपीठादिषु च कृतपदा
धूपदीपालिमांसैः प्रीता देव्यः सदा नः शुभबलिविधिना पांतु वीरेंद्र
वंद्याः १४ ब्रह्मा श्रीशो षडंगो गुह वटुक गणाः भैरवाः क्षेत्रपाला वेता
लादित्यरुद्रा ग्रह वसु मनवः सिद्धसाध्योरगाः सकाद्याः भूता गंधर्वविद्याध
रर्षिपितृयक्षाः सुराद्रिभूता योगीशाश्चारणाः किंपुरुषखगाश्चक

प्र

गाःपांतुसर्वे १४ संतर्पयेत्कृत्वाकाममेवपितृदेवाःशेषश्च योगिनी
प्रीतिश्चात्मरदेवताश्चयदिचेद्देवाःप्रमाणंचवेत् शाक्तेयंयदिदर्शि
नेभवतिचेदाज्ञेयमेषास्तिचेत्संमत्रापिचकौलिकाश्चयदिचेत्स्यात्म
जयःसर्वदा १५ त्वंतुमातरःसर्वाःसरुद्राःसगणाधिपाः योगिन्यः
क्षेत्रपालाश्चममदेहेव्यवस्थिताः १७ शिवाद्यवनिपर्यंतंब्रह्मादिसं
भसंयुतं कालाग्न्यादिशिवांतंचजगद्यज्ञेनतृप्यतु १८ इतिशांति
स्तोत्रं पृथ्वीरवंदनस्तोत्रं ॐपठित्वेदंनमेहीरान्वीरवंदनमाचरेत्

377

ए.

377

ल्वेद्वीगात्रमेद्वीगान्मंत्रसिद्धिःप्रजायते ॐजगत्त्रयाभ्यर्चितशास
नेभ्योपरार्थसंपादनकोविदेभ्यः सम्पूर्तक्लेशमहोरगेभ्योनमो
नमःसाधकनायकेभ्यः १ प्रहीनसर्वाश्रयवासनेभ्यःसर्वार्थनवो
दितसाधनेभ्यः सर्वप्रजाभ्युद्धरणोद्दितेभ्यो नमोनमःसाधकनाय
केभ्यः २ निस्तीर्णसंसारमहार्णवेभ्यःस्वसालतोन्मूलनतत्परेभ्यः
जरारुजामृत्युनिवारकेभ्योनमोनमःसाधकनायकेभ्यः ३ सद्धर्मर
त्नाकरभाजनेभ्योनिर्वाणमार्गोत्तमदैशिकेभ्यः सर्वत्रसंपूर्णमनोरा

येभ्यो नमो नमः साधकनायकेभ्यः ४ लोकानुकंपाभ्युदितादरे
भ्यः कारुण्यमैत्रीपरिभावितेभ्यः सर्वार्थचर्यापरिहारकेभ्यो नमो
नमः साधकनायकेभ्यः ५ विध्वस्तनिःशेषकुवासनेभ्यो ज्ञानाग्नि
नाद्दग्धमलेंधनेभ्यः प्रज्ञाप्रतिज्ञापरिहारकेभ्यो नमो नमः साधक
नायकेभ्यः ६ सर्वार्थिताशापरिपूरकेभ्यो वैनेयपद्माकरबोधके
भ्यः विस्तीर्णसर्वार्थगुणाकरेभ्यो नमो नमः साधकनायकेभ्यः ७
अनंतकर्मार्जितशासनेभ्यो ब्रह्मेन्द्ररुद्रादिनमस्कृतेभ्यः पारस्पराउ

378

५.

ग्रहकारकेभ्यो नमो नमः स्तायकनायकेभ्यः ८ विमग्नभूतादिम
हाभयेभ्यो मंपंचकाचारपरायणेभ्यः समस्तसौभाग्यकलाकरे।
भ्यो नमो नमः स्तायकनायकेभ्यः ९ विमग्नउक्षकर्मजवासनेभ्यः स
मंततोऽनुष्टमहायशोभ्यः लब्धामलज्ञानकृतास्पदेभ्यो नमो नमः
शांभविशांभवेभ्यः १० सर्वागमांवोधिमहाब्धवेभ्यः श्रीवक्रएजार्थ
परायणेभ्यः श्रीवीरचर्याचरणक्षमेभ्यो नमो नमः शांभविशांभवे
भ्यः ११ श्रीमंत्रकोटिद्युतिभूषणेभ्यो द्वात्रिंशडुल्लासदशान्तिगेभ्यः

378

14

२५

ग्रहेतत्त्वास्तमाजनेभ्यो नमो नमः शांभविशांभवेभ्यः १२ षट्
त्रिंशत्तालक्षणभूषितेभ्यः प्रोत्फुल्लपद्माकरलोचनेभ्यः प्रतप्तचा
मीकरविग्रहेभ्यो नमो नमः शांभविशांभवेभ्यः १३ संबोधसंसार
स्वसंस्थितेभ्यः संसारनिर्वाणनिदर्शनेभ्यः महाकृपाविष्टितमा
नसेभ्यो नमो नमः शांभविशांभवेभ्यः १४ परैकविज्ञानरसाकुले
भ्यो वामाश्रिताचारभयानकेभ्यः स्वातंत्र्यविधस्तजगन्मोभ्यो नमो
नमः शांभविशांभवेभ्यः १५ श्मशानचर्यासमहाफलेभ्यो महांय।

379

सू.

379

कारापह्लतिक्तमेभ्यः परस्परापरिपालकेभ्यो नमो नमः शांभवि
शांभवेभ्यः १८ विधूतकेशालिकपालकेभ्यः स्वरासवारकेवि।
लोचनेभ्यः नवीनकांतारततत्परेभ्यो नमो नमः शांभवि शांभवेभ्यः ७
विभूतिलिप्तांगदिगंबरेभ्यश्चिताग्निधूमालिमयानकेभ्यः कपा
लपात्रामृतपानकेभ्यो नमो नमः भैरवि भैरवीभ्यः १८ सिद्धाष्टका
दानमहाशुतिभ्यः श्रीभैरवाचारकृतादरेभ्यः स्वाधीनतान्यकृततति
जेरेभ्यो नमो नमः भैरवि भैरवेभ्यः १९ प्रशांतशास्त्रार्थविचारके

विद्यांतेचस्वाहेति स्वमूलाधारकुंडलिन्यात्मकपरदेवतास्तु।
त्वेहवनत्वया शेषप्रियशिष्याय प्रसादत्त्वयाकिंचिद्दातु
सोपिस्वपात्रेकृत्वातज्जलेप्राश्नीया इत्यंप्रतिपत्तिः ततःस्वगुरू
पदिष्टविधिनाशेषकृत्तंसमापयेत् ततस्ताम्राद्दिपात्रेगंधपुष्पा
ध्यान्नतान्वितंतज्जलमादाय नमोविवस्वतेब्रह्मन्भास्वतेविष्णु
तेजसे नमःसर्वजगत्सवित्रेशुचयेसविश्वेकर्मदायिने ह्रांह्रींहंसः सूर्यप
घेतेर्घःस्वाहेतिसूर्यायार्घ्यंदत्वा कृतांजलिः ॐयज्ञच्छिद्रंतप

९.

380

च्छिद्रंयच्छिद्रंहृज्जनेमम सर्वंतदच्छिद्रमस्तुभास्करस्यप्रसाद
तः इत्यच्छिद्रमवधारयेत् ततःमूलेनप्राणायामऋष्यादिक
रषडंगन्यासान्विधाय षडासनवाग्देवताष्टकन्यासान्विधाय
प्रागुक्तश्रीगुरुस्तोत्रंपठित्वा श्रीगुरुंप्रणम्य मूलविद्यायाद्वि
तीयकूटेननिर्माल्यंशिरसिधृत्वा मूलेनयंत्रलेपंवस्त्रंधृत्वा
मूलविद्ययैवचरणोदकंस्वीकृत्य श्रीपरदेवताभक्तेभ्योनैवेद्या
दिकंविभज्यदत्वा स्वयमपिभुक्त्वा स्वात्मानंकामकलारूपंवि।

380

कल्पलतायपरिधयेनमः स्वर्णप्राकारायनमः तन्म
ध्ये मणिमंडपायनमः तस्यैनैर्ऋत्यादिकोणचतुष्टये
वामावर्तेन कालरूपिणीशक्त्यैनमः देशरूपिणीशक्त्यै
नमः शब्दरूपिणीशक्त्यैनमः मध्ये संगीतयोगिनीभ्यो
नमः तत्रैवसमस्तप्रकटगुप्तसिद्धयोगिनीचक्रेभ्यो न
मः तन्मध्ये मणिमयवेदिकायैनमः तदुपरि श्वेत
छत्रायनमः तदधः रत्नसिंहासनायनमः श्रीचक्राधार

267

श्रीः
२६५

पीठंरत्नसिंहासनत्वेनपरिकल्प्य तस्यवायव्ये धर्माय
नमः नैर्ऋते ज्ञानायनमः आग्नेये वैराग्यायनमः ईशाने
ऐश्वर्यायनमः पश्चिमे अधर्मायनमः दक्षे अज्ञानायनमः
पूर्वे अवैराग्यायनमः उत्तरे अनैश्वर्यायनमः तन्मध्ये
मायायैनमः विद्यायैनमः तदुपरिपंचदशफणावि
रजितायानंतायनमः तन्मध्येमौलौ अष्टदलकमलंका
मेश्वरीपीठंध्यात्वा पद्मायनमः आनंदकंदायनमः सं

267

वसंतादिषट्ऋतुभ्योनमः तत्पश्चिमे इंद्रियाश्वेभ्योनमः
तत्पूर्वे इंद्रियार्थगजेभ्योनमः तन्मध्ये विचित्ररत्नभूमि
कायैनमः तत्पश्चिमे कालचक्रेश्वर्यैनमः नैरृते सु
ज्ञाचक्रेश्वर्यैनमः दक्षिणे मातृचक्रेश्वर्यैनमः आग्नेये र
त्नचक्रेश्वर्यैनमः पूर्वे देशचक्रेश्वर्यैनमः ईशाने गुरु
चक्रेश्वर्यैनमः उत्तरे तत्वचक्रेश्वर्यैनमः वायव्ये ग्रहच
क्रेश्वर्यैनमः मध्ये मूर्तिचक्रेश्वर्यैनमः इतिसंपूज्य तत

पू॰
२
२६२
262

स्तस्मिंह्रासनेपंचप्रेतमयंध्यात्वा वायव्यादिकोणचतुष्टय
गतपादाश्रयत्वेनस्थितान् ब्रह्मविष्णुरुद्रेश्वरान्सहस्रा
र्कप्रभांश्चतुर्भुजांस्तुपविष्टांस्तेषांस्कंधेसंलग्नमुत्तानशा
यिनमुदकशीर्षंसदाशिवमिंद्रप्रभंचध्यात्वा॥ ॐदत्ता
सेविन्यसेद्देविब्रह्माणंश्वेतवर्णंकं लंबकूर्चंचतुर्बाहुंब
हज्जठरमंडलं कमंडलुंजपवटींविद्यांदंडंमनोहरंधा
रयंतंचतुर्वक्त्रंकमलासनसंस्थितं स्वस्वरूपसमानाभ

गायत्र्या वामभूषिते एवं ध्यायेन्महाप्रेतं ब्रह्मणो रूप

मास्थिते ॥ वायव्ये पै लोष्टथिव्यधिपतये ब्रह्मणे नमः

ब्रह्मप्रेतासनश्रीपादुकां पूजयामि नमः वामांसे विष्णु

प्रेतेतनवमेघसमप्रभे वनमालाधरे पीतवसने सु

कुटाहृते शंखचक्रगदापद्मधारयंते मनोहरं गरुडा

सनसंस्थं च श्रीवत्सकौस्तुभांकिते स्वसमानमहालक्ष्मा

सेविते वामभागके एवं ध्यायेन्महाप्रेतं विष्णुरूपं महाद्युतिं ॥

263

पृ॰
२६३
263

ईशाने धँ वांअपामधिपतयेविस्वेनमः विस्वप्रेता सनश्रीपादुकांपूजयामिनमः ॥ दक्षोरोरुद्रप्रेतंत रक्तवर्णंचतुर्भुजं त्रिशूलखट्वांगधरंमुंडमालाविभूषितं चंद्रमौलिंत्रिनेत्रंचवरदाभयपाणिकं विभूतिभूषितंस र्पभूषणंहरसभासनं स्वसमानमहागौर्यावामांगेसेवि तंसदा एवंध्यायेत्महाप्रेतंरुद्ररूपंमहाबलं ॥
आग्नये धँ रांतेजोधिपतयेरुद्रायनमः रुद्रप्रेतासनश्रीपा

भ्यो निहृतनानारसकाव्यकेभ्यः निरस्तनिःशेषविकल्पनेभ्यो नमो
नमः भैरवविभैरवेभ्यः १० स्वात्मैकभावांतरिताशयेभ्यः सा३ऽप
साश्राऽपसस्वाकरेभ्यो श्रीमच्चिदानंदितविग्रहेभ्यो नमो नमः भैर
विभैरवेभ्यः ११ परप्रसादास्पदमासनेभ्यो ब्रह्मादयस्तानरसाकुले
भ्यः शिवोऽहमित्याश्रितचेतनेभ्यो नमो नमः भैरवविभैरवेभ्यः १२
सर्वथा सर्वदा सर्वं सर्वं घटपटादिमत् जगज्जनितविस्तारं ब्रह्मे
दमिति वेद्म्यहं १३ अहमेव परो हंसः शिवः परमकारणं मत्प्राणे

९.

सत्वपक्षात्मालीनः समरसंगतः २४ सच्चिदानंदनिलयं परापर

मकारणं शिवाद्वयप्रकाशात्मस्वरूपामलं धीमहि २५ अनेन

वीरस्तवकीर्तनेन समस्तक्लेशसर्वाससनोहं संसारकांतारमा

हार्णवेस्मिन्निमज्जमानं जगदुद्धरेयं २६ नेदं तत्साधकः सर्वे वि

नश्यंतद्विद्वेषकाः अवश्यापां भवीमेत्वगुरुः सदा इतिपठन्स

र्वान्सामयिकानभिषिंच्य विशेषार्घपात्रमुद्धृत्य शिरसिस्थिता

यगुरवेसमर्प्य नमाङ्कादिभिः समभ्यर्च्य मूलविद्यया गुरुपादुका

समायुक्तं स्वविभक्तविभूषणं कोटिकंदर्पलावण्यंसदाषोडशवा
र्षिकं मंदस्मितमुखांभोजंत्रिनेत्रंचंद्रशेखरं दिव्यांबरस्रगालेयं
दिव्याभरणभूषितं पानपात्रंचविन्मुद्रांत्रिशूलंडमरुंकरैः विद्या
संविदिविभ्राणंसदानंदमुखेक्षणं महाघोरादिनाशेषदेवतागण
सेवितं एवंचिंतांबुजेध्यायेदर्धनारीश्वरंशिवं पुंरूपंवास्मरेद्देवि।
स्त्रीरूपंवाविचिंतयेत् अथवानिष्कलंध्यायेत्सच्चिदानंदलक्षणं
सर्वतेजोमयंदेविसचराचरविग्रहं ततःसंदर्शयेन्मुद्रासप्तकंपरमे।

सू.
१७२

172/2

स्थिरि योनिलिंगवस्त्ररभिहेतिमुद्रावत्तुष्टयं वनमालामहामुद्रान
वमुद्रामपिक्रमात् यथाशक्तिजपेन्मूलंमंत्रंश्रीपादुकामपि मूर्ध्नि
संचिंतयेद्देवि श्रीगुरुंशिवरूपिणं इतिध्यानं अथप्रपंचन्यासः ॐ
ह्सौंस्हौंअंप्रपंचरूपायैश्रियैनमःशिरसि ॐह्सौंस्हौंआंदीपरूपायै
मायायैनमःमुखवृत्ते ॐह्सौंस्हौंइंजलाधिरूपायैकमलायैनमःदक्ष
नेत्रे ॐह्सौंस्हौंईंगिरिरूपायैविष्णुवल्लभायैनमःवामे ह्सौंस्हौंउंपतना
रूपायैपद्मधारिण्यैनमःदक्षकर्णे ॐह्सौंस्हौंऊंपीठरूपायैसमुद्रतन

२

भावयन्सर्वं विहरेत् इति श्रीपरादेवताया नित्यपूजाविधिः
महामाहेश्वराचार्यैः साहिब्कौलाभिधाश्रमे प्रवतीर्णैः समा
लोकाभूरितं शाणिशाक्तितः नाविस्तरातिविस्तारासेषापद्ध।
तिर्ग्रथितैः अनुग्राह्यजनैः श्रीमच्छ्रीविद्याया विनिर्मिता इति
श्रीमच्छ्रीमहामाहेश्वराचार्यसर्ववैदेशिकवरेन्द्रचक्रचूडामणि
साहिब्कौलविरचिता श्रीविद्यानित्यपूजापद्धतिः समाप्तम्

433